

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## षष्ठकाण्डे द्वितीयः प्रश्नः

### सोममन्त्रब्राह्मणनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यदुभौ। उभौ विमुच्य। विमुच्यातिथ्यम्। विमुच्येति वि—मुच्य। आतिथ्यम् गृह्णीयात्। गृह्णीयाद् यज्ञम्। यज्ञँव्वि। विच्छिन्द्यात्। छिन्द्याद् यत्। यदुभौ। उभावविमुच्य। अविमुच्य यथा। अविमुच्येत्यवि—मुच्य। यथाऽनागताय। अनागतायातिथ्यम्। अनागतायेत्यना—गताय। आतिथ्यम् क्रियते। क्रियते तादृक्। तादृगेव। एव तत्। तद् विमुक्तः। विमुक्तोऽन्यः। विमुक्त इति वि—मुक्तः। अन्योऽनड्वान्। अनड्वान् भवति। भवत्यविमुक्तः। अविमुक्तोऽन्यः। अविमुक्त इत्यवि—मुक्तः। अन्योऽथ। अथातिथ्यम्। आतिथ्यम् गृह्णाति। गृह्णाति यज्ञस्य। यज्ञस्य सन्तत्यै। सन्तत्यै पत्नी। सन्तत्या इति सम्—तत्यै। पत्न्यन्वारभते। अन्वारभते पत्नी। अन्वारभत इत्यनु—आरभते। पत्नी हि। हि पारीणह्यस्य। पारीणह्यस्येशे। पारीण-ह्यस्येति पारि—नह्यस्य। ईशे पत्निया। पत्नियैव। एवानुमतम्। अनुमतम् निः। अनुमतमि-त्यनु—मतम्। निर्वपति। वपति यत्। यद् वै। वै पत्नी। पत्नी यज्ञस्य। यज्ञस्य करोति। करोति मिथुनम्। मिथुनम् तत्। तदथो। अथो पत्नियाः। अथो इत्यथो। पत्निया एव। एवैषः। ॥ [१] ॥ एष यज्ञस्य। यज्ञस्यान्वारम्भः। अन्वारम्भोऽनवच्छित्त्यै। अन्वारम्भ इत्यनु—आरम्भः। अनवच्छित्त्यै यावद्भिः। अनवच्छित्त्या इत्यनव—छित्त्यै। यावद्भिर् वै। याव-द्भिरिति यावत्—भिः। वै राजा। राजाऽनुचरैः। अनुचरैरागच्छति। अनुचरैरित्यनु—चरैः। आगच्छति सर्वेभ्यः। आगच्छतीत्या—गच्छति। सर्वेभ्यो वै। वै तेभ्यः। तेभ्य आतिथ्यम्।

आतिथ्यम् क्रियते। क्रियते छन्दाꣳसि। छन्दाꣳसि खलु। खलु वै। वै सोमस्य। सोमस्य राज्ञः। राज्ञोऽनुचराणि। अनुचराण्यग्नेः। अनुचराणीत्यनु—चराणि। अग्नेरातिथ्यम्। आतिथ्यमसि। असि विष्णवे। विष्णवे त्वा। त्वेति। इत्याह। आह गायत्रियै। गायत्रिया एव। एवैतेन। एतेन करोति। करोति सोमस्य। सोमस्यातिथ्यम्। आतिथ्यमसि। असि विष्णवे। विष्णवे त्वा। त्वेति। इत्याह। आह त्रिष्टुभे। त्रिष्टुभ एव। एवैतेन। एतेन करोति। करोत्यतिथेः। अतिथेरा-तिथ्यम्। आतिथ्यमसि। असि विष्णवे। विष्णवे त्वा। त्वेति। इत्याह। आह जगत्यै। जगत्या एव। ॥ [२] ॥ एवैतेन। एतेन करोति। करोत्यग्नये। अग्नये त्वा। त्वा रायस्पोषदाव्ने। राय-स्पोषदाव्ने विष्णवे। रायस्पोषदाव्न इति रायस्पोष—दाव्ने। विष्णवे त्वा। त्वेति। इत्याह। आहानुष्टुभे। अनुष्टुभ एव। अनुष्टुभ इत्यनु—स्तुभे। एवैतेन। एतेन करोति। करोति श्येनाय। श्येनाय त्वा। त्वा सोमभृते। सोमभृते विष्णवे। सोमभृत इति सोम—भृते। विष्णवे त्वा। त्वेति। इत्याह। आह गायत्रियै। गायत्रिया एव। एवैतेन। एतेन करोति। करोति पञ्च। पञ्च कृत्वः। कृत्वो गृह्णाति। गृह्णाति पञ्चाक्षरा। पञ्चाक्षरा पङ्क्तिः। पञ्चाक्षरेति पञ्च—अक्षरा। पङ्क्तिः पाङ्क्तः। पाङ्क्तो यज्ञः। यज्ञो यज्ञम्। यज्ञमेव। एवाव। अव रुन्धे। रुन्धे ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति कस्मात्। कस्माथ् सत्यात्। सत्याद् गायत्रियै। गायत्रिया उभयतः। उभयत आतिथ्यस्य। आतिथ्यस्य क्रियते। क्रियत इति। इति यत्। यदेव। एवादः। अदः सोमम्। सोममा। आऽहरत्। ॥ [३] ॥ अहरत् तस्मात्। तस्माद् गायत्रियै। गायत्रिया उभयतः। उभयत आतिथ्यस्य। आतिथ्यस्य क्रियते। क्रियते पुरस्तात्। पुरस्ताच् च। चोपरिष्टात्। उपरिष्टाच् च। च शिरः। शिरो वै। वा एतत्। एतद् यज्ञस्य। यज्ञस्य यत्। यदातिथ्यम्। आतिथ्यम् नवकपालः। नवकपालः पुरोडाशः। नवकपाल इति नव—कपालः। पुरोडाशो भवति। भवति तस्मात्। तस्मान् नवधा। नवधा शिरः। नवधेति नव—धा। शिरो विष्यूतम्। विष्यूतम् नवकपालः। विष्यूतमिति वि—स्यूतम्। नवकपालः पुरोडाशः। नवकपाल इति नव—कपालः। पुरोडाशो भवति। भवति ते। ते त्रयः। त्रयस्त्रिकपालाः। त्रिकपालास्त्रिवृता। त्रिकपाला इति त्रि—कपालाः। त्रिवृता स्तोमेन। त्रिवृतेति त्रि—वृता। स्तोमेन सम्मिताः। सम्मितास्तेजः। सम्मिता इति सम्—मिताः। तेजस् त्रिवृत्।

त्रिवृत् तेजः। त्रिवृदिति त्रि—वृत्। तेज एव। एव यज्ञस्य। यज्ञस्य शीर्षन्न्। शीर्षन् दधाति। दधाति नवकपालः। नवकपालः पुरोडाशः। नवकपाल इति नव—कपालः। पुरोडाशो भवति। भवति ते। ते त्रयः। त्रयस्त्रिकपालाः। त्रिकपालास्त्रिवृता। त्रिकपाला इति त्रि—कपालाः। त्रिवृता प्राणेन। त्रिवृतेति त्रि—वृता। प्राणेन सम्मिताः। प्राणेनेति प्र—अनेन। सम्मितास्त्रिवृत्। सम्मिता इति सम्—मिताः। त्रिवृद् वै। त्रिवृदिति त्रि—वृत्। वै प्राणः। ॥ [४] ॥ प्राणस्त्रिवृतम्। प्राण इति प्र—अनः। त्रिवृतमेव। त्रिवृतमिति त्रि—वृतम्। एव प्राणम्। प्राणमभिपूर्वम्। प्राणमिति प्र—अनम्। अभिपूर्वय्ँयज्ञस्य। अभिपूर्वमित्यभि—पूर्वम्। यज्ञस्य शीर्षन्न्। शीर्षन् दधाति। दधाति प्रजापतेः। प्रजापतेर् वै। प्रजापतेरिति प्रजा—पतेः। वा एतानि। एतानि पख्ष्माणि। पख्ष्माणि यत्। यदश्ववालाः। अश्ववाला ऐख्षवी। अश्ववाला इत्यश्व—वालाः। ऐख्षवी तिरश्ची। ऐख्षवी इत्यैख्षवी। तिरश्ची यत्। तिरश्ची इति तिरश्ची। यदाश्ववालः। आश्ववालः प्रस्तरः। आश्ववाल इत्याश्व—वालः। प्रस्तरो भवति। प्रस्तर इति प्र—स्तरः। भवत्यैख्षवी। ऐख्षवी तिरश्ची। ऐख्षवी इत्यैख्षवी। तिरश्ची प्रजापतेः। तिरश्ची इति—तिरश्ची। प्रजापतेरेव। प्रजापतेरिति प्रजा—पतेः। एव तत्। तच् चख्षुः। चख्षुः सम्। सम् भरति। भरति देवाः। देवा वै। वै याः। या आहुतीः। आहुतीरजुहवुः। आहुतीरित्या—हुतीः। अजुहवुस्ताः। ता असुराः। असुरा निष्कावम्। निष्कावमादन्न्। आदन् ते। ते देवाः। देवाः कार्ष्मर्यम्। कार्ष्मर्यमपश्यन्न्। अपश्यन् कर्मण्यः। कर्मण्यो वै। वै कर्म। कर्मैनेन। एनेन कुर्वीत। कुर्वीतेति। इति ते। ते कार्ष्मर्यमयान्। कार्ष्मर्यमयान् परिधीन्। कार्ष्मर्यमयानिति कार्ष्मर्य—मयान्। परिधीनकुर्वत। परिधीनिति परि—धीन्। ॥ [५] ॥ अकुर्वत तैः। तैर् वै। वै ते। ते रख्षाꣳसि। रख्षाꣳस्यप। अपाघ्नत। अघ्नत यत्। यत् कार्ष्मर्यमयाः। कार्ष्मर्यमयाः परिधयः। कार्ष्मर्यमया इति कार्ष्मर्य—मयाः। परिधयो भवन्ति। परिधय इति परि—धयः। भवन्ति रख्षसाम्। रख्षसामपहत्यै। अपहत्यै सम्। अपहत्या इत्यप—हत्यै। सꣳ स्पर्शयति। स्पर्शयति रख्षसाम्। रख्षसामनन्ववचाराय। अनन्ववचाराय न। अनन्ववचारायेत्यननु—अवचाराय। न पुरस्तात्। पुरस्तात् परि। परि दधाति। दधात्यादित्यः। आदित्यो हि। ह्येव। एवोद्यन्न्। उद्यन् पुरस्तात्। उद्यन्नित्युत्—यन्न्। पुरस्ताद् रख्षाꣳसि। रख्षाꣳस्य-

प॒हन्ति॑। अ॒प॒हन्त्यू॒र्ध्वे। अ॒प॒हन्तीत्य॑प—हन्ति॑। ऊ॒र्ध्वे स॒मिधौ᳚। ऊ॒र्ध्वे इत्यू॒र्ध्वे। स॒मि-धा॒वा। स॒मि॒धा॒विति॑ सम्—इ॒धौ᳚। आ द॑धाति। द॒धा॒त्यु॒परि॑ष्टात्। उ॒परि॑ष्टादे॒व। ए॒व रक्षा॑ꣳसि। रक्षा॒ꣳ॒स्यप॑। अप॑ हन्ति। ह॒न्ति॒ यजु॑षा। यजु॑षा॒ऽन्याम्। अ॒न्याम् तू॒ष्णीम्। तू॒ष्णीम॒न्याम्। अ॒न्याम् मि॑थुन॒त्वाय॑। मि॒थु॒न॒त्वाय॒ द्वे। मि॒थु॒न॒त्वायेति॑ मिथुन—त्वाय॑। द्वे आ। द्वे इति॒ द्वे। आ द॑धाति। द॒धा॒ति॒ द्वि॒पात्। द्वि॒पाद् यज॑मानः। द्वि॒पादिति॑ द्वि—पात्। यज॑मान॒ः प्रति॑ष्ठित्यै। प्रति॑ष्ठित्यै ब्रह्मवा॒दिनः॑। प्रति॑ष्ठित्या॒ इति॒ प्रति॑—स्थित्यै। ब्र॒ह्म॒वा॒दिनो॑ वद॒न्ति। ब्र॒ह्म॒वा॒दि॒न॒ इति॑ ब्रह्म—वा॒दिनः॑। व॒द॒न्त्य॒ग्निः। ॥ [६] ॥ अ॒ग्निश्च॑। च॒ वै। वा ए॒तौ। ए॒तौ सोम॑ः। सोम॑श्च। च॒ क॒था। क॒था सोमा॑य। सोमा॑याति॒थ्यम्। आ॒ति॒थ्यम् क्रि॒यते᳚। क्रि॒यते॒ न। नाग्नये᳚। अ॒ग्नय॒ इति॑। इति॒ यत्। यद॒ग्नौ। अ॒ग्नाव॒ग्निम्। अ॒ग्निम् म॑थि॒त्वा। म॒थि॒त्वा प्र॒हर॑ति। प्र॒हर॑ति॒ तेन॑। प्र॒हर॒-तीति॑ प्र—हर॑ति। तेनै॒व। ए॒वाग्नये᳚। अ॒ग्नय॑ आति॒थ्यम्। आ॒ति॒थ्यम् क्रि॑यते। क्रि॒यते॒ऽथो᳚। अथो॒ खलु॑। अथो॒ इत्यथो᳚। खल्वा॑हुः। आ॒हु॒र॒ग्निः। अ॒ग्निः सर्वाः᳚। सर्वा॑ दे॒वताः᳚। दे॒वता॒ इति॑। इति॒ यत्। यद्धविः। ह॒विरा॒साद्य॑। आ॒सा॒द्याग्निम्। आ॒सा॒द्येत्या᳚—साद्य॑। अ॒ग्निम् मन्थ॑ति। मन्थ॑ति ह॒व्याय॑। ह॒व्यायै॒व। ए॒वास॑न्नाय। आस॑न्नाय॒ सर्वाः᳚। आस॑न्ना॒येत्या—स॒न्ना॒य॒। सर्वा॑ दे॒वताः᳚। दे॒वता॑ जनयति। ज॒न॒य॒तीति॑ जनयति॥ ॥ [७] ॥

(पत्नि॑या ए॒व जग॑त्या आ त्रि॒वृद्वै परि॑धीन् व॑द॒न्त्ये क॑चत्वारिꣳशच्च) ॥ १ ॥

---

दे॒वा॒सु॒राः सय्ँय॑त्ताः। दे॒वा॒सु॒रा इति॑ देव—अ॒सु॒राः। सय्ँय॑त्ता आसन्न्। सय्ँय॑त्ता॒ इति॒ सम्—य॒त्ताः। आ॒स॒न् ते। ते दे॒वाः। दे॒वा मि॒थः। मि॒थो विप्रि॑याः। विप्रि॑या आसन्न्। विप्रि॑या॒ इति॒ वि—प्रि॒याः। आ॒स॒न् ते। ते᳚ऽन्यः। अ॒न्यो᳚ऽन्यस्मै᳚। अ॒न्यस्मै॒ ज्यैष्ठ्या॑य। ज्यैष्ठ्या॒याति॑ष्ठ-मानाः। अति॑ष्ठमानाः पञ्च॒धा। प॒ञ्च॒धा वि। प॒ञ्च॒धेति॑ पञ्च—धा। व्य॑क्रामन्न्। अ॒क्रा॒म॒न्न॒ग्निः। अ॒ग्निर् वसु॑भिः। वसु॑भिः॒ सोम॑ः। वसु॑भि॒रिति॒ वसु॒—भि॒ः। सोमो॑ रु॒द्रैः। रु॒द्रैरिन्द्र॑ः। इन्द्रो॑ म॒रुद्भि॑ः। म॒रुद्भि॒र् वरु॑णः। म॒रुद्भि॒रिति॑ म॒रुत्—भि॒ः। वरु॑ण आदि॒त्यैः। आ॒दि॒त्यैर् बृह॒-स्पति॑ः। बृह॒स्पति॒र् विश्वैः᳚। विश्वै॒र् दे॒वैः। दे॒वैस्ते। ते॑ऽमन्यन्त। अ॒म॒न्य॒न्ता॒सु॑रेभ्यः। असु॑रेभ्यो॒ वै। वा इ॒दम्। इ॒दम् भ्रातृ॑व्येभ्यः। भ्रातृ॑व्येभ्यो रद्ध्यामः। र॒द्ध्या॒मो॒ यत्। यन् मि॒थः। मि॒थो

विप्रियाः। विप्रिया स्मः। विप्रिया इति वि—प्रियाः। स्मो याः। या नः। न इमाः। इमाः प्रियाः। प्रियास्तनुवः। तनुवस्ताः। ताः समवद्यामहै। समवद्यामहै ताभ्यः। समवद्यामहा इति सम्—अवद्यामहै। ताभ्यः सः। स निः। निरृच्छात्। ऋच्छाद् यः। यो नः। ॥ [८] ॥ नः प्रथमः। प्रथमोऽन्यः। अन्योऽन्यस्मै। अन्यस्मै द्रुह्यात्। द्रुह्यादिति। इति तस्मात्। तस्माद् यः। यः सतानूनप्त्रिणाम्। सतानूनप्त्रिणाम् प्रथमः। सतानूनप्त्रिणामिति स—तानूनप्त्रिणाम्। प्रथमो द्रुह्यति। द्रुह्यति सः। स आर्तिम्। आर्तिमा। आर्च्छति। ऋच्छति यत्। यत् तानूनप्त्रम्। तानूनप्त्रꣳ समवद्यति। तानूनप्त्रमिति तानू—नप्त्रम्। समवद्यति भ्रातृव्याभिभूत्यै। समवद्यतीति सम्—अवद्यति। भ्रातृव्याभिभूत्यै भवति। भ्रातृव्याभिभूत्या इति भ्रातृव्य—अभिभूत्यै। भवत्यात्मना। आत्मना परा। पराऽस्य। अस्य भ्रातृव्यः। भ्रातृव्यो भवति। भवति पञ्च। पञ्च कृत्वः। कृत्वोऽव। अव द्यति। द्यति पञ्चधा। पञ्चधा हि। पञ्चधेति पञ्च—धा। हि ते। ते तत्। तथ् समवाद्यन्त। समवाद्यन्ताथो। समवाद्यन्तेति सम्—अवाद्यन्त। अथो पञ्चाख्षरा। अथो इत्यथो। पञ्चाख्षरा पङ्क्तिः। पञ्चाख्षरेति पञ्च—अख्षरा। पङ्क्तिः पाङ्क्तः। पाङ्क्तो यज्ञः। यज्ञो यज्ञम्। यज्ञमेव। एवाव। अव रुन्धे। रुन्ध आपतये। आपतये त्वा। आपतय इत्या—पतये। त्वा गृह्णामि। गृह्णामीति। इत्याह। आह प्राणः। प्राणो वै। प्राण इति प्र—अनः। वा आपतिः। ॥ [९] ॥ आपतिः प्राणम्। आपतिरित्या—पतिः। प्राणमेव। प्राणमिति प्र—अनम्। एव प्रीणाति। प्रीणाति परिपतये। परिपतय इति। परिपतय इति परि—पतये। इत्याह। आह मनः। मनो वै। वै परिपतिः। परिपतिर् मनः। परिपतिरिति परि—पतिः। मन एव। एव प्रीणाति। प्रीणाति तनूनप्त्रे। तनूनप्त्र इति। तनूनप्त्र इति तनू—नप्त्रे। इत्याह। आह तनुवः। तनुवो हि। हि ते। ते ताः। ताः समवाद्यन्त। समवाद्यन्त शाक्वराय। समवाद्यन्तेति सम्—अवाद्यन्त। शाक्वरायेति। इत्याह। आह शक्त्यै। शक्त्यै हि। हि ते। ते ताः। ताः समवाद्यन्त। समवाद्यन्त शक्मन्न्। समवाद्यन्तेति सम्—अवाद्यन्त। शक्मन्नोजिष्ठाय। ओजिष्ठायेति। इत्याह। आहौजिष्ठम्। ओजिष्ठꣳ हि। हि ते। ते तत्। तदात्मनः। आत्मनः समवाद्यन्त। समवाद्यन्तानाधृष्टम्। समवाद्यन्तेति सम्—अवाद्यन्त। अनाधृष्टमसि। अनाधृष्टमित्यना—धृष्टम्। अस्यनाधृष्यम्। अनाधृष्यमिति। अनाधृष्यमित्यना—धृष्यम्। इत्याह। आहानाधृष्टम्। अना-

धृष्टꣳ हि। अनाधृष्टमित्यना—धृष्टम्। ह्येतत्। एतदनाधृष्यम्। अनाधृष्यम् देवानाम्। अना-धृष्यमित्यना—धृष्यम्। देवानामोजः। ओज इति। ॥ [१०] ॥ इत्याह। आह देवानाम्। देवानाꣳ हि। ह्येतत्। एतदोजः। ओजोऽभिशस्तिपाः। अभिशस्तिपा अनभिशस्तेन्यम्। अभि-शस्तिपा इत्यभिशस्ति—पाः। अनभिशस्तेन्यमिति। अनभिशस्तेन्यमित्यनभि—शस्तेन्यम्। इत्याह। आहाभिशस्तिपाः। अभिशस्तिपा हि। अभिशस्तिपा इत्यभिशस्ति—पाः। ह्येतत्। एतदनभिशस्तेन्यम्। अनभिशस्तेन्यमनु। अनभिशस्तेन्यमित्यनभि—शस्तेन्यम्। अनु मे। मे दीक्षाम्। दीक्षाम् दीक्षापतिः। दीक्षापतिर् मन्यताम्। दीक्षापतिरिति दीक्षा—पतिः। मन्यतामिति। इत्याह। आह यथायजुः। यथायजुरेव। यथायजुरिति यथा—यजुः। एवैतत्। एतद् घृतम्। घृतव्वै। वै देवाः। देवा वज्रम्। वज्रम् कृत्वा। कृत्वा सोमम्। सोममघ्नन्। अघ्न-न्नन्तिकम्। अन्तिकमिव। इव खलु। खलु वै। वा अस्य। अस्यैतत्। एतच् चरन्ति। चरन्ति यत्। यत् तानूनप्त्रेण। तानूनप्त्रेण प्रचरन्ति। तानूनप्त्रेणेति तानू—नप्त्रेण। प्रचरन्त्यꣳशुरꣳशुः। प्रचरन्तीति प्र—चरन्ति। अꣳशुरꣳशुस्ते। अꣳशुरꣳशुरित्यꣳशुः—अꣳशुः। ते देव। देव सोम। सोमा। आ प्यायताम्। प्यायतामिति। इत्याह। आह यत्। यदेव। ॥ [११] ॥ एवास्य। अस्यापुवायते। अपुवायते यत्। यन् मीयते। मीयते तत्। तदेव। एवास्य। अस्यैतेन। एतेना। आ प्याययति। प्याययत्या। आ तुभ्यम्। तुभ्यमिन्द्रः। इन्द्रः प्यायताम्। प्यायतामा। आ त्वम्। त्वमिन्द्राय। इन्द्राय प्यायस्व। प्यायस्वेति। इत्याह। आहोभौ। उभावेव। एवेन्द्रम्। इन्द्रम् च। च सोमम्। सोमम् च। चा। आ प्याययति। प्याययत्या। आ प्यायय। प्यायय सखीन्। सखीन्थ् सन्या। सन्या मेधया। मेधयेति। इत्याह। आहर्त्विजः। ऋत्विजो वै। वा अस्य। अस्य सखायः। सखायस्तान्। तानेव। एवा। आ प्याययति। प्याययति स्वस्ति। स्वस्ति ते। ते देव। देव सोम। सोम सुत्याम्। सुत्यामशीय। अशीयेति। ॥ [१२] ॥ इत्याह। आहाशिषम्। आशिषमेव। आशिषमित्या—शिषम्। एवैताम्। एतामा। आ शास्ते। शास्ते प्र। प्र वै। वा एते। एतेऽस्मात्। अस्माल्लोकात्। लोकाच् च्यवन्ते। च्यवन्ते ये। ये सोमम्। सोम-माप्याययन्ति। आप्याययन्त्यन्तरिक्षदेवत्यः। आप्याययन्तीत्या—प्याययन्ति। अन्तरिक्ष-देवत्यो हि। अन्तरिक्षदेवत्य इत्यन्तरिक्ष—देवत्यः। हि सोमः। सोम आप्यायितः। आप्या-

यित एष्टः। आप्यायित इत्या—प्यायितः। एष्टा रायः। रायः प्र। प्रेषे। इषे भगाय। भगायेति।
इत्याह। आह द्यावापृथिवीभ्याम्। द्यावापृथिवीभ्यामेव। द्यावापृथिवीभ्यामिति द्यावा—पृथि-
वीभ्याम्। एव नमस्कृत्य। नमस्कृत्यास्मिन्न्। नमस्कृत्येति नमः—कृत्य। अस्मिँल्लोके। लोके
प्रति। प्रति तिष्ठन्ति। तिष्ठन्ति देवासुराः। देवासुराः सय्ँयत्ताः। देवासुरा इति देव—असुराः।
सय्ँयत्ता आसन्न्। सय्ँयत्ता इति सम्—यत्ताः। आसन् ते। ते देवाः। देवा बिभ्यतः। बिभ्य-
तोऽग्निम्। अग्निम् प्र। प्राविशन्न्। अविशन् तस्मात्। तस्मादाहुः। आहुरग्निः। अग्निः सर्वाः।
सर्वा देवताः। देवता इति। इति ते। तेऽग्निम्। ॥ [१३] ॥ अग्निमेव। एव वरूथम्। वरूथम्
कृत्वा। कृत्वाऽसुरान्। असुरानभि। अभ्यभवन्न्। अभवन्नग्निम्। अग्निमिव। इव खलु। खलु
वै। वा एषः। एष प्र। प्र विशति। विशति यः। योऽवान्तरदीख्षाम्। अवान्तरदीख्षामुपैति।
अवान्तरदीख्षामित्यवान्तर—दीख्षाम्। उपैति भ्रातृव्याभिभूत्यै। उपैतीत्युप—एति। भ्रातृ-
व्याभिभूत्यै भवति। भ्रातृव्याभिभूत्या इति भ्रातृव्य—अभिभूत्यै। भवत्यात्मना। आत्मना परा।
पराऽस्य। अस्य भ्रातृव्यः। भ्रातृव्यो भवति। भवत्यात्मानम्। आत्मानमेव। एव दीख्षया।
दीख्षया पाति। पाति प्रजाम्। प्रजामवान्तरदीख्षया। प्रजामिति प्र—जाम्। अवान्तरदीख्षया
सन्तराम्। अवान्तरदीख्षयेत्यवान्तर—दीख्षया। सन्तराम् मेखलाम्। सन्तरामिति सम्—
तराम्। मेखलाꣳ समायच्छते। समायच्छते प्रजा। समायच्छत इति सम्—आयच्छते। प्रजा
हि। प्रजेति प्र—जा। ह्यात्मनः। आत्मनोऽन्तरतरा। अन्तरतरा तप्तव्रतः। अन्तरतरेत्यन्तर—
तरा। तप्तव्रतो भवति। तप्तव्रत इति तप्त—व्रतः। भवति मदन्तीभिः। मदन्तीभिर् मार्जयते।
मार्जयते निः। निर्हि। ह्यग्निः। अग्निः शीतेन। शीतेन वायति। वायति समिद्ध्यै। समिद्ध्यै या।
समिद्ध्या इति सम्—इद्ध्यै। या ते। ते अग्ने। अग्ने रुद्रिया। रुद्रिया तनूः। तनूरिति। इत्याह।
आह स्वया। स्वयैव। एवैनत्। एनद् देवतया। देवतया व्रतयति। व्रतयति सयोनित्वाय। सयो-
नित्वाय शान्त्यै। सयोनित्वायेति सयोनि—त्वाय। शान्त्या इति शान्त्यै॥ ॥ [१४] ॥

(यो वा ओजं आह य दशीये ति तेऽग्न एकादश च) ॥ २ ॥

तेषामसुराणाम्। असुराणाम् तिस्रः। तिस्रः पुरः। पुर आसन्न्। आसन्नयस्मयी। अय-स्मय्य्वमा। अवमाऽथ। अथ रजता। रजताऽथ। अथ हरिणी। हरिणी ताः। ता देवाः। देवा जेतुम्। जेतुम् न। नाशंक्कुवन्न्। अशक्कुवन् ताः। ता उपसदा। उपसदैव। उपसदेत्युप—सदा। एवाजिगीषन्न्। अजिगीषन् तस्मात्। तस्मादाहुः। आहुर् यः। यश्च। चैवम्। एवव्वेद। वेद् यः। यश्च। च न। नोपसदा। उपसदा वै। उपसदेत्युप—सदा। वै महापुरम्। महापुरम् जयन्ति। महापुरमिति महा—पुरम्। जयन्तीति। इति ते। त इषुम्। इषुꣳ सम्। समस्कुर्वत। अकुर्वताग्निम्। अग्निमनीकम्। अनीकꣳ सोमम्। सोमꣳ शल्यम्। शल्यव्विष्णुम्। विष्णुम् तेजनम्। तेजनम् ते। तेऽब्रुवन्न्। अब्रुवन् कः। क इमाम्। इमामसिष्यति। असिष्यतीति। इति रुद्रः। ॥ [१५] ॥ रुद्र इति। इत्यब्रुवन्न्। अब्रुवन् रुद्रः। रुद्रो वै। वै क्रूरः। क्रूरः सः। सोऽस्यतु। अस्यत्विति। इति सः। सोऽब्रवीत्। अब्रवीद् वरम्। वरव्वृणै। वृणा अहम्। अहमेव। एव पशूनाम्। पशूनामधिपतिः। अधिपतिरसानि। अधिपतिरित्यधि—पतिः। असा-नीति। इति तस्मात्। तस्माद् रुद्रः। रुद्रः पशूनाम्। पशूनामधिपतिः। अधिपतिस्ताम्। अधि-पतिरित्यधि—पतिः। ताꣳ रुद्रः। रुद्रोऽव। अवासृजत्। असृजथ् सः। स तिस्रः। तिस्रः पुरः। पुरो भित्वा। भित्वैभ्यः। एभ्यो लोकेभ्यः। लोकेभ्योऽसुरान्। असुरान् प्र। प्राणुदत। अनुदत यत्। यदुपसदः। उपसद उपसद्यन्ते। उपसद इत्युप—सदः। उपसद्यन्ते भ्रातृव्यप-राणुत्यै। उपसद्यन्त इत्युप—सद्यन्ते। भ्रातृव्यपराणुत्यै न। भ्रातृव्यपराणुत्या इति भ्रातृव्य—पराणुत्यै। नान्याम्। अन्यामाहुतिम्। आहुतिम् पुरस्तात्। आहुतिमित्या—हुतिम्। पुरस्ताज् जुहुयात्। जुहुयाद् यत्। यदन्याम्। अन्यामाहुतिम्। आहुतिम् पुरस्तात्। आहुतिमित्या—हुतिम्। पुरस्ताज् जुहुयात्। जुहुयादन्यत्। ॥ [१६] ॥ अन्यन् मुखम्। मुखम् कुर्यात्। कुर्याथ् स्रुवेण। स्रुवेणाघारम्। आघारमा। आघारमित्या—घारम्। आ घारयति। घारयति यज्ञस्य। यज्ञस्य प्रज्ञात्यै। प्रज्ञात्यै पराङ्। प्रज्ञात्या इति प्र—ज्ञात्यै। पराङतिक्रम्य। अतिक्रम्य जुहोति। अतिक्रम्येत्यति—क्रम्य। जुहोति पराचः। पराच एव। एवैभ्यः। एभ्यो लोकेभ्यः। लोकेभ्यो यजमानः। यजमानो भ्रातृव्यान्। भ्रातृव्यान् प्र। प्र णुदते। नुदते पुनः। पुनरत्या-क्रम्य। अत्याक्रम्योपसदम्। अत्याक्रम्येत्यति—आक्रम्य। उपसदम् जुहोति। उपसदमित्युप—

सदम्। जुहोति प्रणुद्य। प्रणुद्यैव। प्रणुद्येति प्र—नुद्य। एवैभ्यः। एभ्यो लोकेभ्यः। लोकेभ्यो भ्रातृव्यान्। भ्रातृव्यान् जित्वा। जित्वा भ्रातृव्यलोकम्। भ्रातृव्यलोकमभ्यारोहति। भ्रातृव्यलोकमिति भ्रातृव्य—लोकम्। अभ्यारोहति देवाः। अभ्यारोहतीत्यभि—आरोहति। देवा वै। वै याः। याः प्रातः। प्रातरुपसदः। उपसद उपासीदन्न्। उपसद इत्युप—सदः। उपासीदन्नह्नः। उपासीदन्नित्युप—असीदन्न्। अह्नस्ताभिः। ताभिरसुरान्। असुरान् प्र। प्राणुदन्त। अनुदन्त याः। याः सायम्। सायꣳ रात्रियै। रात्रियै ताभिः। ताभिर् यत्। यथ् सायम्प्रातः। सायम्प्रातरुपसदः। सायम्प्रातरिति सायम्—प्रातः। उपसद उपसद्यन्ते। उपसद इत्युप—सदः। ॥ [१७] ॥ उपसद्यन्तेऽहोरात्राभ्याम्। उपसद्यन्त इत्युप—सद्यन्ते। अहोरात्राभ्यामेव। अहोरात्राभ्यामित्यहः—रात्राभ्याम्। एव तत्। तद् यजमानः। यजमानो भ्रातृव्यान्। भ्रातृव्यान् प्र। प्र णुदते। नुदते याः। याः प्रातः। प्रातर् याज्याः। याज्याः स्युः। स्युस्ताः। ताः सायम्। सायम् पुरोनुवाक्याः। पुरोनुवाक्याः कुर्यात्। पुरोनुवाक्या इति पुरः—अनुवाक्याः। कुर्यादयातयामत्वाय। अयातयामत्वाय तिस्रः। अयातयामत्वायेत्ययातयाम—त्वाय। तिस्र उपसदः। उपसद उप। उपसद इत्युप—सदः। उपैति। एति त्रयः। त्रय इमे। इमे लोकाः। लोका इमान्। इमानेव। एव लोकान्। लोकान् प्रीणाति। प्रीणाति षट्। षट्थ् सम्। सम् पद्यन्ते। पद्यन्ते षट्। षड् वै। वा ऋतवः। ऋतव ऋतून्। ऋतूनेव। एव प्रीणाति। प्रीणाति द्वादश। द्वादशाहीने। अहीने सोमे। सोम उप। उपैति। एति द्वादश। द्वादश मासाः। मासाः सँव्वथ्सरः। सँव्वथ्सरः सँव्वथ्सरम्। सँव्वथ्सर इति सम्—वथ्सरः। सँव्वथ्सरमेव। सँव्वथ्सरमिति सम्—वथ्सरम्। एव प्रीणाति। प्रीणाति चतुर्विꣳशतिः। चतुर्विꣳशतिः सम्। चतुर्विꣳशतिरिति चतुः—विꣳशतिः। सम्पद्यन्ते। ॥ [१८] ॥ पद्यन्ते चतुर्विꣳशतिः। चतुर्विꣳशतिरर्द्धमासाः। चतुर्विꣳशतिरिति चतुः—विꣳशतिः। अर्द्धमासा अर्द्धमासान्। अर्द्धमासा इत्यर्द्ध—मासाः। अर्द्धमासानेव। अर्द्धमासानित्यर्द्ध—मासान्। एव प्रीणाति। प्रीणात्याराग्राम्। आराग्रामवान्तरदीख्षाम्। आराग्रामित्यारा—अग्राम्। अवान्तरदीख्षामुप। अवान्तरदीख्षामित्यवान्तर—दीख्षाम्। उपेयात्। इयाद् यः। यः कामयेत। कामयेतास्मिन्न्। अस्मिन् मे। मे लोके। लोकेऽर्द्धुकम्। अर्द्धुकꣳ स्यात्। स्यादिति। इत्येकम्। एकमग्रे। अग्रेऽथ। अथ द्वौ। द्वावथ।

अथ त्रीन्। त्रीनथ। अथ चतुरः। चतुर एषा। एषा वै। वा आराग्रा। आराग्राऽवान्तरदीख्षा। आराग्रेत्यारा—अग्रा। अवान्तरदीख्षाऽस्मिन्न्। अवान्तरदीख्षेत्यवान्तर—दीख्षा। अस्मिन्नेव। एवास्मै। अस्मै लोके। लोकेऽर्द्धुकम्। अर्द्धुकम् भवति। भवति परोवरीयसीम्। परोवरीयसीमवान्तरदीख्षाम्। परोवरीयसीमिति परः—वरीयसीम्। अवान्तरदीख्षामुप। अवान्तरदीख्षामित्यवान्तर—दीख्षाम्। उपेयात्। इयाद् यः। यः कामयेत। कामयेतामुष्मिन्न्। अमुष्मिन् मे। मे लोके। लोकेऽर्द्धुकम्। अर्द्धुकꣳ स्यात्। स्यादिति। इति चतुरः। चतुरोऽग्रे। अग्रेऽथ। अथ त्रीन्। त्रीनथ। अथ द्वौ। द्वावथ। अथैकम्। एकमेषा। एषा वै। वै परोवरीयसी। परोवरीयस्यवान्तरदीख्षा। परोवरीयसीति परः—वरीयसी। अवान्तरदीख्षाऽमुष्मिन्न्। अवान्तरदीख्षेत्यवान्तर—दीख्षा। अमुष्मिन्नेव। एवास्मै। अस्मै लोके। लोकेऽर्द्धुकम्। अर्द्धुकम् भवति। भवतीति भवति॥ ॥ [१९] ॥

(असिष्यतीति जुहुयाथ् सायम् प्रातरुपसद श्चतुर्विꣳशतिः सम् चतुरोऽग्रे षोडश च) ॥ ३ ॥

---

सुवर्गव्वै। सुवर्गमिति सुवः—गम्। वा एते। एते लोकम्। लोकय्यँन्ति। यन्ति ये। य उपसदः। उपसद उपयन्ति। उपसद इत्युप—सदः। उपयन्ति तेषाम्। उपयन्तीत्युप—यन्ति। तेषाय्यँः। य उन्नयते। उन्नयते हीयते। उन्नयत इत्युत्—नयते। हीयत एव। एव सः। स न। नोत्। उदनेषि। अनेषीति। इति सून्नीयम्। सून्नीयमिव। सून्नीयमिति सु—उन्नीयम्। इव यः। यो वै। वै स्वार्थेताम्। स्वार्थेताय्यँताम्। स्वार्थेतामिति स्वार्थ—इताम्। यताꣳ श्रान्तः। श्रान्तो हीयते। हीयत उत। उत सः। स निष्ट्याय। निष्ट्याय सह। सह वसति। वसति तस्मात्। तस्माथ् सकृत्। सकृदुन्नीय। उन्नीय न। उन्नीयेत्युत्—नीय। नापरम्। अपरमुत्। उन् नयेत। नयेत दद्ध्ना। दद्ध्नोत्। उन् नयेत। नयेतैतत्। एतद् वै। वै पशूनाम्। पशूनाꣳ रूपम्। रूपꣳ रूपेण। रूपेणैव। एव पशून्। पशूनव। अव रुन्धे। रुन्धे यज्ञः। ॥ [२०] ॥ यज्ञो देवेभ्यः। देवेभ्यो निलायत। निलायत विष्णुः। विष्णू रूपम्। रूपम् कृत्वा। कृत्वा सः। स पृथिवीम्। पृथिवीम् प्र। प्राविशत्। अविशत् तम्। तम् देवाः। देवा हस्तान्। हस्तान्थ् सꣳरभ्य। सꣳरभ्यैच्छन्न्। सꣳरभ्येति सम्—रभ्य। ऐच्छन् तम्। तमिन्द्रः। इन्द्र उपर्युपरि। उपर्युपर्यति।

उपर्युपरीत्युपरि—उपरि। अत्यक्रामत्। अक्रामथ् सः। सोऽब्रवीत्। अब्रवीत् कः। को मा। माऽयम्। अयमुपर्युपरि। उपर्युपर्यति। उपर्युपरीत्युपरि—उपरि। अत्यक्रमीत्। अक्रमीदिति। इत्यहम्। अहम् दुर्गे। दुर्गे हन्ता। दुर्ग इति दुः—गे। हन्तेति। इत्यथ। अथ कः। कस्त्वम्। त्वमिति। इत्यहम्। अहम् दुर्गात्। दुर्गादाहर्ता। दुर्गादिति दुः—गात्। आहर्तेति। आहर्तेत्या—हर्ता। इति सः। सोऽब्रवीत्। अब्रवीद् दुर्गे। दुर्गे वै। दुर्ग इति दुः—गे। वै हन्ता। हन्ताऽवोचथाः। अवोचथा वराहः। वराहोऽयम्। अयँव्वाममोषः। वाममोषः सप्तानाम्। वाममोष इति वाम—मोषः। ॥ [२१] ॥ सप्तानाम् गिरीणाम्। गिरीणाम् परस्तात्। परस्ताद् वित्तम्। वित्तँव्वेद्यम्। वेद्यमसुराणाम्। असुराणाम् बिभर्ति। बिभर्ति तम्। तम् जहि। जहि यदि। यदि दुर्गे। दुर्गे हन्ता। दुर्ग इति दुः—गे। हन्ताऽसि। असीति। इति सः। स दर्भपुञ्जीलम्। दर्भपुञ्जीलमुद्वृह्य। दर्भपुञ्जीलमिति दर्भ—पुञ्जीलम्। उद्वृह्य सप्त। उद्वृह्येत्युत्—वृह्य। सप्त गिरीन्। गिरीन् भित्वा। भित्वा तम्। तमहन्न्। अहन्थ् सः। सोऽब्रवीत्। अब्रवीद् दुर्गात्। दुर्गाद् वै। दुर्गादिति दुः—गात्। वा आहर्ता। आहर्ताऽवोचथाः। आहर्तेत्या—हर्ता। अवोचथा एतम्। एतमा। आ हर। हरेति। इति तम्। तमेभ्यः। एभ्यो यज्ञः। यज्ञ एव। एव यज्ञम्। यज्ञमा। आऽहरत्। अहरद् यत्। यत् तत्। तद् वित्तम्। वित्तँव्वेद्यम्। वेद्यमसुराणाम्। असुराणामविन्दन्त। अविन्दन्त तत्। तदेकम्। एकँव्वेद्यै। वेद्यै वेदित्वम्। वेदित्वमसुराणाम्। वेदित्वमिति वेदि—त्वम्। असुराणाँव्वै। ॥ [२२] ॥ वा इयम्। इयमग्रे। अग्र आसीत्। आसीद् यावत्। यावदासीनः। आसीनः परापश्यति। परापश्यति तावत्। परापश्यतीति परा—पश्यति। तावद् देवानाम्। देवानाम् ते। ते देवाः। देवा अब्रुवन्न्। अब्रुवन्नस्तु। अस्त्वेव। एव नः। नोऽस्याम्। अस्यामपि। अपीति। इति कियत्। कियद् वः। वो दास्यामः। दास्याम इति। इति यावत्। यावदियम्। इयꣳ सलावृकी। सलावृकी त्रिः। त्रिः परिक्रामति। परिक्रामति तावत्। परिक्रामतीति परि—क्रामति। तावन् नः। नो दत्त। दत्तेति। इति सः। स इन्द्रः। इन्द्रः सलावृकी। सलावृकी रूपम्। रूपम् कृत्वा। कृत्वेमाम्। इमाम् त्रिः। त्रिः सर्वतः। सर्वतः परि। पर्यक्रामत्। अक्रामत् तत्। तदिमाम्। इमामविन्दन्त। अविन्दन्त यत्। यदिमाम्। इमामविन्दन्त। अविन्दन्त तत्। तद् वेद्यै। वेद्यै वेदित्वम्। वेदित्वꣳ सा। वेदित्वमिति वेदि—त्वम्। ॥ [२३] ॥ सा वै। वा

इयम्। इयꣳ सर्वा। सर्वैव। एव वेदिः। वेदिरियति। इयति शख्ष्यामि। शख्ष्यामीति। इति तु। त्वै। वा अवमाय। अवमाय यजन्ते। अवमायेत्यव—माय। यजन्ते त्रिꣳशत्। त्रिꣳशत् पदानि। पदानि पश्चात्। पश्चात् तिरश्ची। तिरश्ची भवति। भवति षट्त्रिꣳशत्। षट्त्रिꣳशत् प्राची। षट्त्रिꣳशदिति षट्—त्रिꣳशत्। प्राची चतुर्विꣳशतिः। चतुर्विꣳशतिः पुरस्तात्। चतुर्विꣳशति-रिति चतुः—विꣳशतिः। पुरस्तात् तिरश्ची। तिरश्ची दशदश। दशदश सम्। दशदशेति दश—दश। सम् पद्यन्ते। पद्यन्ते दशाख्षरा। दशाख्षरा विराट्। दशाख्षरेति दश—अख्षरा। विरा-डन्नम्। विराडिति वि—राट्। अन्नँव्विराट्। विराड् विराजा। विराडिति वि—राट्। विराजैव। विराजेति वि—राजा। एवान्नाद्यम्। अन्नाद्यमव। अन्नाद्यमित्यन्न—अद्यम्। अव रुन्धे। रुन्ध उत्। उद्धन्ति। हन्ति यत्। यदेव। एवास्याः। अस्या अमेद्ध्यम्। अमेद्ध्यम् तत्। तदप। अप हन्ति। हन्त्युत्। उद्धन्ति। हन्ति तस्मात्। तस्मादोषधयः। ओषधयः परा। परा भवन्ति। भवन्ति बर्हिः। बर्हिः स्तृणाति। स्तृणाति तस्मात्। तस्मादोषधयः। ओषधयः पुनः। पुनरा। आ भवन्ति। भवन्त्युत्तरम्। उत्तरम् बर्हिषः। उत्तरमित्युत्—तरम्। बर्हिष उत्तरबर्हिः। उत्तरबर्हिः स्तृणाति। त्तरबर्हिरित्युत्तर—बर्हिः। स्तृणाति प्रजाः। प्रजा वै। प्रजा इति प्र—जाः। वै बर्हिः। बर्हिर् यजमानः। यजमान उत्तरबर्हिः। उत्तरबर्हिर् यजमानम्। उत्तर-बर्हिरित्युत्तर—बर्हिः। यजमानमेव। एवायजमानात्। अयजमानादुत्तरम्। उत्तरम् करोति। उत्तरमित्युत्—तरम्। करोति तस्मात्। तस्माद् यजमानः। यजमानोऽयजमानात्। अयजमा-नादुत्तरः। उत्तर इत्युत्—तरः॥ ॥ [२४] ॥

(रुन्धे वाममोषो वेदित्वमसुराणाम् वेदित्वम् भवन्ति पञ्चविꣳशतिश्च) ॥ ४ ॥

यद् वै। वा अनीशानः। अनीशानो भारम्। भारमादत्ते। आदत्ते वि। आदत्त इत्या—दत्ते। वि वै। वै सः। स लिशते। लिशते यत्। यद् द्वादश। द्वादश साह्नस्य। साह्नस्योपसदः। साह्नस्येति स—अह्नस्य। उपसदः स्युः। उपसद इत्युप—सदः। स्युस्तिस्रः। तिस्रोऽहीनस्य। अहीनस्य यज्ञस्य। यज्ञस्य विलोम। विलोम क्रियेत। विलोमेति वि—लोम। क्रियेत तिस्रः। तिस्र एव। एव साह्नस्य। साह्नस्योपसदः। साह्नस्येति स—अह्नस्य। उपसदो द्वादश। उप-

सद इत्युप—सदः। द्वादशाहीनस्य। अहीनस्य यज्ञस्य। यज्ञस्य सवीर्यत्वाय। सवीर्यत्वायाथो। सवीर्यत्वायेति सवीर्य—त्वाय। अथो सलोम। अथो इत्यथो। सलोम क्रियते। सलोमेति स—लोम। क्रियते वथ्सस्य। वथ्सस्यैकः। एकः स्तनः। स्तनो भागी। भागी हि। हि सः। सोऽथ। अथैकम्। एकङ्ँ स्तनम्। स्तनवँव्रतम्। व्रतमुप। उपैति। एत्यथ। अथ द्वौ। द्वावथ। अथ त्रीन्। त्रीनथ। अथ चतुरः। चतुर एतत्। एतद् वै। वै ख्षुरपवि। ॥ [२५] ॥ ख्षुरपवि नाम। ख्षुरपवीति ख्षुर—पवि। नाम व्रतम्। व्रतय्ँयेन। येन प्र। प्र जातान्। जातान् भ्रातृव्यान्। भ्रातृव्यान् नुदते। नुदते प्रति। प्रति जनिष्यमाणान्। जनिष्यमाणानथो। अथो कनीयसा। अथो इत्यथो। कनीयसैव। एव भूयः। भूय उप। उपैति। एति चतुरः। चतुरोऽग्रे। अग्रे स्तनान्। स्तनान् व्रतम्। व्रतमुप। उपैति। एत्यथ। अथ त्रीन्। त्रीनथ। अथ द्वौ। द्वावथ। अथैकम्। एकमेतत्। एतद् वै। वै सुजघनम्। सुजघनम् नाम। सुजघनमिति सु—जघनम्। नाम व्रतम्। व्रतम् तपस्यम्। तपस्यꣳ सुवर्ग्यम्। सुवर्ग्यमथो। सुवर्ग्यमिति सुवः—ग्यम्। अथो प्र। अथो इत्यथो। प्रैव। एव जायते। जायते प्रजया। प्रजया पशुभिः। प्रजयेति प्र—जया। पशुभिर् यवागूः। पशुभिरिति पशु—भिः। यवागू राजन्यस्य। राजन्यस्य व्रतम्। व्रतम् क्रूरा। क्रूरेव। इव वै। वै यवागूः। यवागूः क्रूरः। क्रूर इव। इव राजन्यः। ॥ [२६] ॥ राजन्यो वज्रस्य। वज्रस्य रूपम्। रूपꣳ समृद्ध्यै। समृद्ध्या आमिख्षा। समृद्ध्या इति सम्—ऋद्ध्यै। आमिख्षा वैश्यस्य। वैश्यस्य पाकयज्ञस्य। पाकयज्ञस्य रूपम्। पाकयज्ञस्येति पाक—यज्ञस्य। रूपम् पुष्ट्यै। पुष्ट्यै पयः। पयो ब्राह्मणस्य। ब्राह्मणस्य तेजः। तेजो वै। वै ब्राह्मणः। ब्राह्मणस्तेजः। तेजः पयः। पयस्तेजसा। तेजसैव। एव तेजः। तेजः पयः। पय आत्मन्न्। आत्मन् धत्ते। धत्तेऽथो। अथो पयसा। अथो इत्यथो। पयसा वै। वै गर्भाः। गर्भा वर्द्धन्ते। वर्द्धन्ते गर्भः। गर्भ इव। इव खलु। खलु वै। वा एषः। एष यत्। यद् दीख्षितः। दीख्षितो यत्। यदस्य। अस्य पयः। पयो व्रतम्। व्रतम् भवति। भवत्यात्मानम्। आत्मानमेव। एव तत्। तद् वर्द्धयति। वर्द्धयति त्रिव्रतः। त्रिव्रतो वै। त्रिव्रत इति त्रि—व्रतः। वै मनुः। मनुरासीत्। आसीद् द्विव्रताः। द्विव्रता असुराः। द्विव्रता इति द्वि—व्रताः। असुरा एकव्रताः। एकव्रता देवाः। एकव्रता इत्येक—व्रताः। ॥ [२७] ॥ देवाः प्रातः। प्रातर् मद्ध्यन्दिने। मद्ध्यन्दिने सायम्। सायम् तत्। तन्

मनोः। मनोर् व्रतम्। व्रतमासीत्। आसीत् पाकयज्ञस्य। पाकयज्ञस्य रूपम्। पाकयज्ञस्येति पाक—यज्ञस्य। रूपम् पुष्ट्यै। पुष्ट्यै प्रातः। प्रातश्च। च सायम्। सायम् च। चासुराणाम्। असु-राणाम् निर्मद्ध्यम्। निर्मद्ध्यम् क्षुधः। निर्मद्ध्यमिति निः—मद्ध्यम्। क्षुधो रूपम्। रूपम् ततः। ततस्ते। ते परा। पराऽभवन्न्। अभवन् मद्ध्यन्दिने। मद्ध्यन्दिने मद्ध्यरात्रे। मद्ध्यरात्रे देवानाम्। मद्ध्यरात्र इति मद्ध्य—रात्रे। देवानाम् ततः। ततस्ते। तेऽभवन्न्। अभवन्थ् सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन्यत्। यदस्य। अस्य मद्ध्यन्दिने। मद्ध्यन्दिने मद्ध्यरात्रे। मद्ध्यरात्रे व्रतम्। मद्ध्यरात्र इति मद्ध्य—रात्रे। व्रतम् भवति। भवति मद्ध्यतः। मद्ध्यतो वै। वा अन्नेन। अन्नेन भुञ्जते। भुञ्जते मद्ध्यतः। मद्ध्यत एव। एव तत्। तदूर्जम्। ऊर्जम् धत्ते। धत्ते भ्रातृव्याभिभूत्यै। भ्रातृव्याभिभूत्यै भवति। भ्रातव्याभिभूत्या इति भ्रातृव्य—अभिभूत्यै। भवत्यात्मना। आत्मना परा। ॥ [२८] ॥ परास्य। अस्य भ्रातृव्यः। भ्रातृव्यो भवति। भवति गर्भः। गर्भो वै। वा एषः। एष यत्। यद् दीक्षितः। दीक्षितो योनिः। योनिर् दीक्षितविमितम्। दीक्षितविमितय्ँयत्। दीक्षितविमितमिति दीक्षित—विमितम्। यद् दीक्षितः। दीक्षितो दीक्षितविमितात्। दीक्षितविमितात् प्रवसेत्। दीक्षितविमिता-दिति दीक्षित—विमितात्। प्रवसेद् यथा। प्रवसेदिति प्र—वसेत्। यथा योनेः। योनेर् गर्भः। गर्भः स्कन्दति। स्कन्दति तादृक्। तादृगेव। एव तत्। तन् न। न प्रवस्तव्यम्। प्रवस्तव्यमा-त्मनः। प्रवस्तव्यमिति प्र—वस्तव्यम्। आत्मनो गोपीथाय। गोपीथायैषः। एष वै। वै व्याघ्रः। व्याघ्रः कुलगोपः। कुलगोपो यत्। कुलगोप इति कुल—गोपः। यदग्निः। अग्निस्तस्मात्। तस्माद् यत्। यद् दीक्षितः। दीक्षितः प्रवसेत्। प्रवसेथ् सः। प्रवसेदिति प्र—वसेत्। स एनम्। एनमीश्वरः। ईश्वरोऽनूत्थाय। अनूत्थाय हन्तोः। अनूत्थायेत्यनु—उत्थाय। हन्तोर् न। न प्रवस्तव्यम्। प्रवस्तव्यमात्मनः। प्रवस्तव्यमिति प्र—वस्तव्यम्। आत्मनो गुप्त्यै। गुप्त्यै दक्षिणतः। दक्षिणतः शये। शय एतत्। एतद् वै। वै यजमानस्य। यजमानस्यायतनम्। आयतनꣳ स्वे। आयतनमित्या—यतनम्। स्व एव। एवायतने। आयतने शये। आयतन इत्या—यतने। शयेऽग्निम्। अग्निमभ्यावृत्य। अभ्यावृत्य शये। अभ्यावृत्येत्यभि—आवृत्य।

शये देवताः। देवता एव। एव यज्ञम्। यज्ञमभ्यावृत्य। अभ्यावृत्य शये। अभ्यावृत्येत्यभि—आवृत्य। शय इति शये॥ ॥ [२९] ॥

(एतद्वै क्रूर इवै कव्रता आत्मना यजमानस्य त्रयोदश च) ॥ ५ ॥

पुरोहविषि देवयजने। पुरोहविषीति पुरः—हविषि। देवयजने याजयेत्। देवयजन इति देव—यजने। याजयेद् यम्। यम् कामयेत। कामयेतोप। उपैनम्। एनमुत्तरः। उत्तरो यज्ञः। उत्तर इत्युत्—तरः। यज्ञो नमेत्। नमेदभि। अभि सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकम् जयेत्। जयेदिति। इत्येतत्। एतद् वै। वै पुरोहविः। पुरोहविर् देवयजनम्। पुरोहविरिति पुरः—हविः। देवयजनय्ँयस्य। देवयजनमिति देव—यजनम्। यस्य होता। होता प्रातरनुवाकम्। प्रातरनुवाकमनुब्रुवन्न्। प्रातरनुवाकमिति प्रातः—अनुवाकम्। अनुब्रुवन्नग्निम्। अनुब्रुवन्नित्यनु—ब्रुवन्न्। अग्निमपः। अप आदित्यम्। आदित्यमभि। अभि विपश्यति। विपश्यत्युप। विपश्यतीति वि—पश्यति। उपैनम्। एनमुत्तरः। उत्तरो यज्ञः। उत्तर इत्युत्—तरः। यज्ञो नमति। नमत्यभि। अभि सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकम् जयति। जयत्याप्ते। आप्ते देवयजने। देवयजने याजयेत्। देवयजन इति देव—यजने। याजयेद् भ्रातृव्यवन्तम्। भ्रातृव्यवन्तम् पन्थाम्। भ्रातृव्यवन्तमिति भ्रातृव्य—वन्तम्। पन्थाव्ँवा। वाऽधिस्पर्शयेत्। अधिस्पर्शयेत् कर्तम्। अधिस्पर्शयेदित्यधि—स्पर्शयेत्। कर्तव्ँवा। वा यावत्। यावन् न। नानसे। अनसे यातवै। यातवै न। ॥ [३०] ॥ न रथाय। रथायैतत्। एतद् वै। वा आप्तम्। आप्तम् देवयजनम्। देवयजनमाप्नोति। देवयजनमिति देव—यजनम्। आप्नोत्येव। एव भ्रातृव्यम्। भ्रातृव्यम् न। नैनम्। एनम् भ्रातृव्यः। भ्रातृव्य आप्नोति। आप्नोत्येकोन्नते। एकोन्नते देवयजने। एकोन्नत इत्येक—उन्नते। देवयजने याजयेत्। देवयजन इति देव—यजने। याजयेत् पशुकामम्। पशुकाममेकोन्नतात्। पशुकाममिति पशु—कामम्। एकोन्नताद् वै। एकोन्नतादित्येक—उन्नतात्। वै देवयजनात्। देवयजनादङ्गिरसः। देवयजनादिति देव—यजनात्। अङ्गिरसः पशून्। पशूनसृजन्त। असृजन्तान्तरा। अन्तरा सदोहविर्द्धाने। सदोहविर्द्धाने उन्नतम्। सदोहविर्द्धाने इति सदः—हविर्द्धाने। उन्नतꣳ स्यात्। उन्न-

तमित्युत्—नतम्। स्यादेतत्। एतद् वै। वा एकोन्नतम्। एकोन्नतम् देवयजनम्। एकोन्नतमित्येक—उन्नतम्। देवयजनम् पशुमान्। देवयजनमिति देव—यजनम्। पशुमानेव। पशुमानिति पशु—मान्। एव भवति। भवति त्र्युन्नते। त्र्युन्नते देवयजने। त्र्युन्नत इति त्रि—उन्नते। देवयजने याजयेत्। देवयजन इति देव—यजने। याजयेथ् सुवर्गकामम्। सुवर्गकामम् त्र्युन्नतात्। सुवर्गकाममिति सुवर्ग—कामम्। त्र्युन्नताद् वै। त्र्युन्नतादिति त्रि—उन्नतात्। वै देवयजनात्। देवयजनादङ्गिरसः। देवयजनादिति देव—यजनात्। अङ्गिरसः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन्नन्तरा। अन्तराऽऽहवनीयम्। आहवनीयम् च। आहवनीयमित्या—हवनीयम्। च हविर्द्धानम्। हविर्द्धानम् च। हविर्द्धानमिति हविः—धानम्। चोन्नतम्। ॥ [३१] ॥ उन्नतꣳ स्यात्। उन्नतमित्युत्—नतम्। स्यादन्तरा। अन्तरा हविर्द्धानम्। हविर्द्धानम् च। हविर्द्धानमिति हविः—धानम्। च सदः। सदश्च। चान्तरा। अन्तरा सदः। सदश्च। च गार्हपत्यम्। गार्हपत्यम् च। गार्हपत्यमिति गार्ह—पत्यम्। चैतत्। एतद् वै। वै त्र्युन्नतम्। त्र्युन्नतम् देवयजनम्। त्र्युन्नतमिति त्रि—उन्नतम्। देवयजनꣳ सुवर्गम्। देवयजनमिति देव—यजनम्। सुवर्गमेव। सुवर्गमिति सुवः—गम्। एव लोकम्। लोकमेति। एति प्रतिष्ठिते। प्रतिष्ठिते देवयजने। प्रतिष्ठित इति प्रति—स्थिते। देवयजने याजयेत्। देवयजन इति देव—यजने। याजयेत् प्रतिष्ठाकामम्। प्रतिष्ठाकाममेतत्। प्रतिष्ठाकाममिति प्रतिष्ठा—कामम्। एतद् वै। वै प्रतिष्ठितम्। प्रतिष्ठितम् देवयजनम्। प्रतिष्ठितमिति प्रति—स्थितम्। देवयजनय्ँयत्। देवयजनमिति देव—यजनम्। यथ् सर्वतः। सर्वतः समम्। समम् प्रति। प्रत्येव। एव तिष्ठति। तिष्ठति यत्र। यत्रान्याअन्याः। अन्याअन्या ओषधयः। अन्याअन्या इत्यन्याः—अन्याः। ओषधयो व्यतिषक्ताः। व्यतिषक्ताः स्युः। व्यतिषक्ता इति वि—अतिषक्ताः। स्युस्तत्। तद् याजयेत्। याजयेत् पशुकामम्। पशुकाममेतत्। पशुकाममिति पशु—कामम्। एतद् वै। वै पशूनाम्। पशूनाꣳ रूपम्। रूपꣳ रूपेण। रूपेणैव। एवास्मै। अस्मै पशून्। पशूनव। ॥ [३२] ॥ अव रुन्धे। रुन्धे पशुमान्। पशुमानेव। पशुमानिति पशु—मान्। एव भवति। भवति निर्ऋतिगृहीते। निर्ऋतिगृहीते देवयजने। निर्ऋतिगृहीत इति निर्ऋति—गृहीते। देवयजने याजयेत्। देवयजन इति देव—यजने। याजयेद् यम्। यम् कामयेत।

का॒मये॑त॒ निर्॒ऋ॑त्या। निर्॒ऋ॑त्याऽस्य। निर्॒ऋ॑त्ये॒ति॒ निः—ऋ॒त्या॒। अ॒स्य॒ य॒ज्ञम्। य॒ज्ञम् ग्रा॑ह-
येयम्। ग्रा॒ह॒ये॒यमिति॑। इत्ये॒तत्। ए॒तद् वै। वै निर्॒ऋ॑तिगृहीतम्। निर्॒ऋ॑तिगृहीतम् दे॒वयज॑नम्।
निर्॒ऋ॑तिगृहीत॒मिति॒ निर्॒ऋ॑ति—गृ॒ही॒तम्। दे॒वयज॑न॒य्यँत्। दे॒वयज॑न॒मिति॑ देव—यज॑नम्। यथ्
स॒दृश्यै᳚। स॒दृश्यै॑ स॒त्याः᳚। स॒त्या॑ ऋ॒ख्षम्। ऋ॒ख्षम् निर्॒ऋ॑त्या। निर्॒ऋ॑त्यै॒व। निर्॒ऋ॑त्ये॒ति॒
निः—ऋ॒त्या॒। ए॒वास्य॑। अ॒स्य॒ य॒ज्ञम्। य॒ज्ञम् ग्रा॑हयति। ग्रा॒ह॒य॒ति॒ व्यावृ॑त्ते। व्यावृ॑त्ते दे॒वय-
ज॑ने। व्यावृ॑त्त॒ इति॑ वि—आवृ॑त्ते। दे॒वयज॑ने याजयेत्। दे॒वयज॑न॒ इति॑ देव—यज॑ने। या॒ज॒ये॒द्
व्या॒वृ॒त्का॑मम्। व्या॒वृ॒त्का॑म॒य्यँम्। व्या॒वृ॒त्का॑म॒मिति॑ व्या॒वृ॒त्—का॒म॒म्। यम् पात्रे᳚। पात्रे॑ वा। वा॒
तल्पे᳚। तल्पे॑ वा। वा॒ मीमा॑ꣳसेरन्न्। मीमा॑ꣳसेरन् प्रा॒चीन᳚म्। प्रा॒चीन॑माह॒वनीया᳚त्। आ॒ह॒वनीया᳚त्
प्र॒वण॒म्। आ॒ह॒वनी॒या॒दित्या᳚—ह॒वनीया᳚त्। प्र॒वणꣳ॒स्या᳚त्। प्र॒वण॒मिति॑ प्र—व॒नम्। स्या॒त् प्र॒ती॒-
चीन᳚म्। प्र॒ती॒ची॒नम् गार्॒ह॑पत्यात्। गार्॒ह॑पत्यादे॒तत्। गार्॒ह॑पत्या॒दिति॒ गार्॒ह॑—प॒त्या॒त्। ए॒तद्
वै। वै व्यावृ॑त्तम्। व्यावृ॑त्तम् दे॒वयज॑नम्। व्यावृ॑त्त॒मिति॑ वि—आवृ॑त्तम्। दे॒वयज॑ना॒व्विँ। दे॒वय-
ज॑न॒मिति॑ देव—यज॑नम्। वि पा॒प्मना᳚। पा॒प्मना॒ भ्रातृ॑व्येण। भ्रातृ॑व्ये॒णा। आ व॑र्तते। व॒र्त॒ते न।
नैन᳚म्। ए॒नम् पात्रे᳚। पात्रे॒ न। न तल्पे᳚। तल्पे॑ मीमाꣳसन्ते। मी॒मा॒ꣳ॒स॒न्ते॒ का॒र्ये᳚। का॒र्ये॑ दे॒व-
यज॑ने। दे॒वयज॑ने याजयेत्। दे॒वयज॑न॒ इति॑ देव—यज॑ने। या॒ज॒ये॒द् भूति॑कामम्। भूति॑कामम्
का॒र्यः॑। भूति॑काम॒मिति॒ भूति॑—का॒म॒म्। का॒र्यो᳚ वै। वै पुरु॑षः। पुरु॑षो॒ भव॑ति। भव॑त्ये॒व। ए॒वे-
त्ये॒व॥ ॥ [३३] ॥

(या॒तवै॑ ह॑वि॒र्धान॑म् च प॒शून् पा॒प्मना॒ ऽष्टाद॑श च) ॥ ६ ॥

तेभ्य॑ उत्तरवे॒दिः। उ॒त्त॒र॒वे॒दिः सि॒ꣳ॒हीः। उ॒त्त॒र॒वे॒दिरित्यु॑त्तर—वे॒दिः। सि॒ꣳ॒ही रू॒पम्। रू॒पम्
कृ॒त्वा। कृ॒त्वोभया॑न्। उ॒भया॑नन्त॒रा। अ॒न्त॒राऽप॒क्रम्य॑। अ॒प॒क्रम्या॑तिष्ठत्। अ॒प॒क्रम्येत्य॑प—
क्रम्य॑। अ॒ति॒ष्ठ॒त् ते। ते दे॒वाः। दे॒वा अ॑मन्यन्त। अ॒म॒न्य॒न्त॒ य॒त॒रान्। य॒त॒रान्वै। वा इ॒यम्।
इ॒यमु॑पाव॒थ्स्यति॑। उ॒पा॒व॒थ्स्यति॒ ते। उ॒पा॒व॒त्स्यतीत्यु॑प—आ॒व॒थ्स्यति॑। त इ॒दम्। इ॒दम् भ॑वि-
ष्यन्ति। भ॒वि॒ष्य॒न्तीति॑। इति॒ ताम्। तामुप॑। उपा॑मन्त्रयन्त। अ॒म॒न्त्र॒य॒न्त॒ सा। साऽब्र॑वीत्।
अ॒ब्र॒वी॒द् वर᳚म्। वर॑व्वृँणै। वृ॒णै सर्वा॑न्। सर्वा॒न् मया᳚। मया॒ कामा॑न्। कामा॒न्वि॒। व्य॑श्नवथ।

अश्वत्थ पूर्वाम्। पूर्वाम् तु। तु मा। माऽग्नेः। अग्नेराहुतिः। आहुतिरश्नवतै। आहुतिरित्या—हुतिः। अश्नवता इति। इति तस्मात्। तस्मादुत्तरवेदिम्। उत्तरवेदिम् पूर्वाम्। उत्तरवेदिमि-त्युत्तर—वेदिम्। पूर्वामग्नेः। अग्नेर् व्याघारयन्ति। व्याघारयन्ति वारवृतम्। व्याघारयन्तीति वि—आघारयन्ति। वारवृतꣳ हि। वारवृतमिति वार—वृतम्। ह्यस्यै। अस्यै शम्यया। शम्यया परि। परि मिमीते। मिमीते मात्रा। ॥ [३४] ॥ मात्रैव। एवास्यै। अस्यै सा। साऽथो। अथो युक्तेन। अथो इत्यथो। युक्तेनैव। एव युक्तम्। युक्तमव। अव रुन्धे। रुन्धे वित्तायनी। वित्ता-यनी मे। वित्तायनीति वित्त—अयनी। मेऽसि। असीति। इत्याह। आह वित्ता। वित्ता हि। ह्येनान्। एनानावत्। आवत् तिक्तायनी। तिक्तायनी मे। तिक्तायनीति तिक्त—अयनी। मेऽसि। असीति। इत्याह। आह तिक्तान्। तिक्तान्हि। ह्येनान्। एनानावत्। आवदवतात्। अवतान् मा। मा नाथितम्। नाथितमिति। इत्याह। आह नाथितान्। नाथितान्हि। ह्येनान्। एनानावत्। आवदवतात्। अवतान् मा। मा व्यथितम्। व्यथितमिति। इत्याह। आह व्यथितान्। व्यथि-तान्हि। ह्येनान्। एनानावत्। आवद् विदेः। विदेरग्निः। अग्निर् नभः। नभो नाम। नामाग्ने। ॥ [३५] ॥ अग्ने अङ्गिरः। अङ्गिर इति। इति त्रिः। त्रिर्हरति। हरति ये। य एव। एवैषु। एषु लोकेषु। लोकेष्वग्नयः। अग्नयस्तान्। तानेव। एवाव। अव रुन्धे। रुन्धे तूष्णीम्। तूष्णीम् चतुर्थम्। चतुर्थꣳ हरति। हरत्यनिरुक्तम्। अनिरुक्तमेव। अनिरुक्तमित्यनिः—उक्तम्। एवाव। अव रुन्धे। रुन्धे सिꣳहीः। सिꣳहीरसि। असि महिषीः। महिषीरसि। असीति। इत्याह। आह सिꣳहीः। सिꣳहीर्हि। ह्येषा। एषा रूपम्। रूपम् कृत्वा। कृत्वोभयान्। उभयानन्तरा। अन्त-राऽपक्रम्य। अपक्रम्यातिष्ठत्। अपक्रम्येत्यप—क्रम्य। अतिष्ठदुरु। उरु प्रथस्व। प्रथस्वोरु। उरु ते। ते यज्ञपतिः। यज्ञपतिः प्रथताम्। यज्ञपतिरिति यज्ञ—पतिः। प्रथतामिति। इत्याह। आह यजमानम्। यजमानमेव। एव प्रजया। प्रजया पशुभिः। प्रजयेति प्र—जया। पशुभिः प्रथयति। पशुभिरिति पशु—भिः। प्रथयति ध्रुवा। ध्रुवाऽसि। ॥ [३६] ॥ असीति। इति सम्। सꣳ हन्ति। हन्ति धृत्यै। धृत्यै देवेभ्यः। देवेभ्यः शुन्धस्व। शुन्धस्व देवेभ्यः। देवेभ्यः शुम्भस्व। शुम्भस्वेति। इत्यव। अव च। चोत्खषति। उत्खषति प्र। प्र च। च किरति। किरति शुद्ध्यै। शुद्ध्या इन्द्रघोषः। इन्द्रघोष स्त्वा। इन्द्रघोष इतीन्द्र—घोषः। त्वा वसुभिः। वसुभिः पुरस्तात्।

वसुभिरिति वसु—भिः। पुरस्तात् पातु। पात्विति। इत्याह। आह दिग्भ्यः। दिग्भ्य एव। दिग्भ्य इति दिक्—भ्यः। एवैनाम्। एनाम् प्र। प्रोक्षति। उक्षति देवान्। देवाङ्श्च। चेत्। इदुत्तर-वेदिः। उत्तरवेदिरुपाववर्ति। उत्तरवेदिरित्युत्तर—वेदिः। उपाववर्तीह। उपाववर्तीत्युप—आव-वर्ति। इहैव। एव वि। वि जयामहै। जयामहा इति। इत्यसुराः। असुरा वज्रम्। वज्रमुद्यत्य। उद्यत्य देवान्। उद्यत्येत्युत्—यत्य। देवानभि। अभ्यायन्त। आयन्त तान्। तानिन्द्रघोषः। इन्द्रघोषो वसुभिः। इन्द्रघोष इतीन्द्र—घोषः। वसुभिः पुरस्तात्। वसुभिरिति वसु—भिः। पुर-स्तादप। अपानुदत। ॥ [३७] ॥ अनुदत मनोजवाः। मनोजवाः पितृभिः। मनोजवा इति मनः—जवाः। पितृभिर् दक्षिणतः। पितृभिरिति पितृ—भिः। दक्षिणतः प्रचेताः। प्रचेता रुद्रैः। प्रचेता इति प्र—चेताः। रुद्रैः पश्चात्। पश्चाद् विश्वकर्मा। विश्वकर्माऽऽदित्यैः। विश्व-कर्मेति विश्व—कर्मा। आदित्यैरुत्तरतः। उत्तरतो यत्। उत्तरत इत्युत्—तरतः। यदेवम्। एव-मुत्तरवेदिम्। उत्तरवेदिम् प्रोक्षति। उत्तरवेदिमित्युत्तर—वेदिम्। प्रोक्षति दिग्भ्यः। प्रोक्ष-तीति प्र—उक्षति। दिग्भ्य एव। दिग्भ्य इति दिक्—भ्यः। एव तत्। तद् यजमानः। यज-मानो भ्रातृव्यान्। भ्रातृव्यान् प्र। प्र णुदते। नुदत इन्द्रः। इन्द्रो यतीन्। यतीन्थ् सालावृकेभ्यः। सालावृकेभ्यः प्र। प्रायच्छत्। अयच्छत् तान्। तान् दक्षिणतः। दक्षिणत उत्तरवेद्याः। उत्त-रवेद्या आदन्न्। उत्तरवेद्या इत्युत्तर—वेद्याः। आदन्न्यत्। यत् प्रोक्षणीनाम्। प्रोक्षणीनामु-च्छिष्येत। प्रोक्षणीनामिति प्र—उक्षणीनाम्। उच्छिष्येत तत्। उच्छिष्येतेत्युत्—शिष्येत। तद् दक्षिणतः। दक्षिणत उत्तरवेद्यै। उत्तरवेद्यै नि। उत्तरवेद्या इत्युत्तर—वेद्यै। नि नयेत्। नयेद् यत्। यदेव। एव तत्र। तत्र क्रूरम्। क्रूरम् तत्। तत् तेन। तेन शमयति। शमयति यम्। यम् द्विष्यात्। द्विष्यात् तम्। तम् ध्यायेत्। ध्यायेच्छुचा। शुचैव। एवैनम्। एनमर्पयति। अर्पयतीत्यर्पयति॥ ॥ [३८] ॥

(मिमीते नाम ध्रुवा ऽप शुचा त्रीणि च) ॥ ७ ॥

सोत्तरवेदिः। उत्तरवेदिरब्रवीत्। उत्तरवेदिरित्युत्तर—वेदिः। अब्रवीथ् सर्वान्। सर्वान् मया। मया कामान्। कामान्वि। व्यश्नवथ। अश्नवथेति। इति ते। ते देवाः। देवा अका-

मयन्त। अकामयन्तासुरान्। असुरान् भ्रातृव्यान्। भ्रातृव्यानभि। अभि भवेम। भवेमेति। इति ते। तेऽजुहवुः। अजुहवुः सिꣳहीः। सिꣳहीरसि। असि सपत्नसाही। सपत्नसाही स्वाहा। सपत्नसाहीति सपत्न—साही। स्वाहेति। इति ते। तेऽसुरान्। असुरान् भ्रातृव्यान्। भ्रातृव्यानभि। अभ्यभवन्न्। अभवन् ते। तेऽसुरान्। असुरान् भ्रातृव्यान्। भ्रातृव्यानभिभूय। अभिभूयाकामयन्त। अभिभूयेत्यभि—भूय। अकामयन्त प्रजाम्। प्रजाव्ँविन्देमहि। प्रजामिति प्र—जाम्। विन्देमहीति। इति ते। तेऽजुहवुः। अजुहवुः सिꣳहीः। सिꣳहीरसि। असि सुप्रजावनिः। सुप्रजावनिः स्वाहा। सुप्रजावनिरिति सुप्रजा—वनिः। स्वाहेति। इति ते। ते प्रजाम्। प्रजामविन्दन्त। प्रजामिति प्र—जाम्। अविन्दन्त ते। ते प्रजाम्। प्रजाव्ँवित्वा। प्रजामिति प्र—जाम्। वित्वाऽकामयन्त। ॥ [३९] ॥ अकामयन्त पशून्। पशून्विन्देमहि। विन्देमहीति। इति ते। तेऽजुहवुः। अजुहवुः सिꣳहीः। सिꣳहीरसि। असि रायस्पोषवनिः। रायस्पोषवनिः स्वाहा। रायस्पोषवनिरिति रायस्पोष—वनिः। स्वाहेति। इति ते। ते पशून्। पशूनविन्दन्त। अविन्दन्त ते। ते पशून्। पशून्वित्वा। वित्वाऽकामयन्त। अकामयन्त प्रतिष्ठाम्। प्रतिष्ठाव्ँविन्देमहि। प्रतिष्ठामिति प्रति—स्थाम्। विन्देमहीति। इति ते। तेऽजुहवुः। अजुहवुः सिꣳहीः। सिꣳहीरसि। अस्यादित्यवनिः। आदित्यवनिः स्वाहा। आदित्यवनिरित्यादित्य—वनिः। स्वाहेति। इति ते। त इमाम्। इमाम् प्रतिष्ठाम्। प्रतिष्ठामविन्दन्त। प्रतिष्ठामिति प्रति—स्थाम्। अविन्दन्त ते। त इमाम्। इमाम् प्रतिष्ठाम्। प्रतिष्ठाव्ँवित्वा। प्रतिष्ठामिति प्रति—स्थाम्। वित्वाऽकामयन्त। अकामयन्त देवताः। देवता आशिषः। आशिष उप। आशिष इत्या—शिषः। उपेयाम। इयामेति। इति ते। तेऽजुहवुः। अजुहवुः सिꣳहीः। सिꣳहीरसि। अस्या। आ वह। वह देवान्। देवान् देवयते। देवयते यजमानाय। देवयत इति देव—यते। ॥ [४०] ॥ यजमानाय स्वाहा। स्वाहेति। इति ते। ते देवताः। देवता आशिषः। आशिष उप। आशिष इत्या—शिषः। उपायन्न्। आयन् पञ्च। पञ्च कृत्वः। कृत्वो व्याघारयति। व्याघारयति पञ्चाक्षरा। व्याघारयतीति वि—आघारयति। पञ्चाक्षरा पङ्क्तिः। पञ्चाक्षरेति पञ्च—अक्षरा। पङ्क्तिः पाङ्क्तः। पाङ्क्तो यज्ञः। यज्ञो यज्ञम्। यज्ञमेव। एवाव। अव रुन्धे। रुन्धेऽक्ष्णया। अक्ष्णया व्याघारयति। व्याघारयति तस्मात्। व्याघारयतीति वि—आघारयति। तस्मादक्ष्णया। अक्ष्णया पशवः। पश-

वोऽङ्गानि। अङ्गानि प्र। प्र हरन्ति। हरन्ति प्रतिष्ठित्यै। प्रतिष्ठित्यै भूतेभ्यः। प्रतिष्ठित्या इति प्रति—स्थित्यै। भूतेभ्यस्त्वा। त्वेति। इति स्रुचम्। स्रुचमुत्। उद् गृह्णाति। गृह्णाति ये। य एव। एव देवाः। देवा भूताः। भूता स्तेषाम्। तेषाम् तत्। तद् भागधेयम्। भागधेयम् तान्। भागधेयमिति भाग—धेयम्। तानेव। एव तेन। तेन प्रीणाति। प्रीणाति पौतुद्रवान्। पौतुद्रवान् परिधीन्। परिधीन् परि। परिधीनिति परि—धीन्। परि दधाति। दधात्येषाम्। एषाल्ँलोकानाम्। ॥ [४१] ॥ लोकानाव्ँविधृत्यै। विधृत्या अग्नेः। विधृत्या इति वि—धृत्यै। अग्नेस्त्रयः। त्रयो ज्यायाꣳसः। ज्यायाꣳसो भ्रातरः। भ्रातर आसन्न्। आसन् ते। ते देवेभ्यः। देवेभ्यो हव्यम्। हव्यव्ँवहन्तः। वहन्तः प्र। प्रामीयन्त। अमीयन्त सः। सोऽग्निः। अग्निरबिभेत्। अबिभेदित्थम्। इत्थव्ँवाव। वाव स्यः। स्य आर्तिम्। आर्तिमा। आऽरिष्यति। अरिष्यतीति। इति सः। स निलायत। निलायत सः। स याम्। याव्ँवनस्पतिषु। वनस्पतिष्ववसत्। अवसत् ताम्। ताम् पूतुद्रौ। पूतुद्रौ याम्। यामोषधीषु। ओषधीषु ताम्। ताꣳ सुगन्धितेजने। सुगन्धितेजने याम्। सुगन्धितेजन इति सुगन्धि—तेजने। याम् पशुषु। पशुषु ताम्। ताम् पेत्वस्य। पेत्वस्यान्तरा। अन्तरा शृङ्गे। शृङ्गे तम्। शृङ्गे इति शृङ्गे। तम् देवताः। देवता प्रैषम्। प्रैषमैच्छन्न्। प्रैषमिति प्र—एषम्। ऐच्छन् तम्। तमनु। अन्वविन्दन्न्। अविन्दन् तम्। तमब्रुवन्न्। अब्रुवन्नुप। ॥ [४२] ॥ उप नः। न आ। आ वर्तस्व। वर्तस्व हव्यम्। हव्यम् नः। नो वह। वहेति। इति सः। सोऽब्रवीत्। अब्रवीद् वरम्। वरव्ँवृणै। वृणै यत्। यदेव। एव गृहीतस्य। गृहीतस्याहुतस्य। अहुतस्य बहिःपरिधि। बहिःपरिधि स्कन्दात्। बहिःपरिधीति बहिः—परिधि। स्कन्दात् तत्। तन् मे। मे भ्रातॄणाम्। भ्रातॄणाम् भागधेयम्। भागधेयमसत्। भागधेयमिति भाग—धेयम्। असदिति। इति तस्मात्। तस्माद् यत्। यद् गृहीतस्य। गृहीतस्याहुतस्य। अहुतस्य बहिःपरिधि। बहिःपरिधि स्कन्दति। बहिःपरिधीति बहिः—परिधि। स्कन्दति तेषाम्। तेषाम् तत्। तद् भागधेयम्। भागधेयम् तान्। भागधेयमिति भाग—धेयम्। तानेव। एव तेन। तेन प्रीणाति। प्रीणाति सः। सोऽमन्यत। अमन्यतास्थन्वन्तः। अस्थन्वन्तो मे। अस्थन्वन्त इत्यस्थन्न्—वन्तः। मे पूर्वे। पूर्वे भ्रातरः। भ्रातरः प्र। प्रामेषत। अमेषतास्थानि। अस्थानि शातयै। शातया इति। इति सः। स यानि। यान्यस्थानि। ॥ [४३] ॥ अस्थान्यशातयत।

अशातयत तत्। तत् पूतुद्रु। पूतुद्र्वभवत्। अभवद् यत्। यन् मा॒ꣳसम्। मा॒ꣳसमुपमृतम्। उप-मृतम् तत्। उपमृतमित्युप—मृतम्। तद् गुल्गुलु। गुल्गुलु यत्। यदेतान्। एतान्थ् सम्भारान्। सम्भारान्थ् सम्भरति। सम्भारानिति सम्—भारान्। सम्भरत्यग्निम्। सम्भरतीति सम्—भरति। अग्निमेव। एव तत्। तथ् सम्। सम् भरति। भरत्यग्नेः। अग्नेः पुरीषम्। पुरीषमसि। असीति। इत्याह। आहाग्नेः। अग्नेर्हि। ह्येतत्। एतत् पुरीषम्। पुरीषय्ँयत्। यथ् सम्भाराः। सम्भारा अथो। सम्भारा इति सम्—भाराः। अथो खलु। अथो इत्यथो। खल्वाहुः। आहुरेते। एते वाव। वावैनम्। एनम् ते। ते भ्रातरः। भ्रातरः परि। परि शेरे। शेरे यत्। यत् पौतुद्रवाः। पौतुद्रवाः परिधयः। परिधय इति। परिधय इति परि—धयः। इतीतीति॥ ॥ [४४] ॥

(वित्त्वा देवयत एषा मब्रुवन् यानि चतुश्चत्वारिꣳशच्च) ॥ ८ ॥

---

बद्धमव। अव स्यति। स्यति वरुणपाशात्। वरुणपाशादेव। वरुणपाशादिति वरुण—पाशात्। एवैनं। एनं मुञ्चति। एन इत्येनं। मुञ्चति प्र। प्र णेनेक्ति। नेनेक्ति मेद्ध्ये। मेद्ध्ये एव। मेद्ध्ये इति मेद्ध्ये। एवैनं। एनं करोति। एन इत्येनं। करोति सावित्रिया। सावित्रि-यर्चा। ऋचा हुत्वा। हुत्वा हविर्द्धाने। हविर्द्धाने प्र। हविर्द्धाने इति हविः—धाने। प्र वर्त-यति। वर्तयति सवितृप्रसूतः। सवितृप्रसूत एव। सवितृप्रसूत इति सवितृ—प्रसूतः। एवैनं। एनं प्र। एन इत्येनं। प्र वर्तयति। वर्तयति वरुणः। वरुणो वै। वा एषः। एष दुर्वाक्। दुर्वागुभ-यतः। दुर्वागिति दुः—वाक्। उभयतो बद्धः। बद्धो यत्। यदख्षः। अख्षः सः। स यत्। यदुथ्सर्जेत्। उथ्सर्जेद् यजमानस्य। उथ्सर्जेदित्युत्—सर्जेत्। यजमानस्य गृहान्। गृहान-भ्युथ्सर्जेत्। अभ्युथ्सर्जेथ् सुवाक्। अभ्युथ्सर्जेदित्यभि—उथ्सर्जेत्। सुवाग् देव। सुवागिति सु—वाक्। देव दुर्यान्। दुर्याꣳ आ। आ वद। वदेति। इत्याह। आह गृहाः। गृहा वै। वै दुर्याः। दुर्याः शान्त्यै। शान्त्यै पत्नी। पत्न्युप। ॥ [४५] ॥ उपानक्ति। अनक्ति पत्नी। पत्नी हि। हि सर्वस्य। सर्वस्य मित्रम्। मित्रम् मित्रत्वाय। मित्रत्वाय यत्। मित्रत्वायेति मित्र—त्वाय। यद् वै। वै पत्नी। पत्नी यज्ञस्य। यज्ञस्य करोति। करोति मिथुनम्। मिथुनम् तत्। तदथो। अथो पत्नियाः। अथो इत्यथो। पत्निया एव। एवैषः। एष यज्ञस्य। यज्ञस्यान्वारम्भः।

अन्वारम्भोऽनवच्छित्त्यै। अन्वारम्भ इत्यनु—आरम्भः। अनवच्छित्त्यै वर्त्मना। अनवच्छित्त्या इत्यनव—छित्त्यै। वर्त्मना वै। वा अन्वित्य। अन्वित्य यज्ञम्। अन्वित्येत्यनु—इत्य। यज्ञꣳ रक्षाꣳसि। रक्षाꣳसि जिघाꣳसन्ति। जिघाꣳसन्ति वैष्णवीभ्याम्। वैष्णवीभ्यामृग्भ्याम्। ऋग्भ्याँव्वर्त्मनोः। ऋग्भ्यामित्यृक्—भ्याम्। वर्त्मनोर् जुहोति। जुहोति यज्ञः। यज्ञो वै। वै विष्णुः। विष्णुर् यज्ञात्। यज्ञादेव। एव रक्षाꣳसि। रक्षाꣳस्यप। अप हन्ति। हन्ति यत्। यदद्ध्वर्युः। अद्ध्वर्युरनग्नौ। अनग्नावाहुतिम्। आहुतिम् जुहुयात्। आहुतिमित्या—हुतिम्। जुहुयादन्धः। अन्धोऽद्ध्वर्युः। अद्ध्वर्युः स्यात्। स्याद् रक्षाꣳसि। रक्षाꣳसि यज्ञम्। यज्ञꣳ हन्युः। हन्युर्हिरण्यम्। ॥ [४६] ॥ हिरण्यमुपास्य। उपास्य जुहोति। उपासेत्युप—अस्य। जुहोत्यग्निवति। अग्निवत्येव। अग्निवतीत्यग्नि—वति। एव जुहोति। जुहोति न। नान्धः। अन्धोऽद्ध्वर्युः। अद्ध्वर्युर् भवति। भवति न। न यज्ञम्। यज्ञꣳ रक्षाꣳसि। रक्षाꣳसि घ्नन्ति। घ्नन्ति प्राची। प्राची प्र। प्राची इति प्राची। प्रेतम्। इतमद्ध्वरम्। अद्ध्वरम् कल्पयन्ती। कल्पयन्ती इति। कल्पयन्ती इति कल्पयन्ती। इत्याह। आह सुवर्गम्। सुवर्गमेव। सुवर्गमिति सुवः—गम्। एवैने। एने लोकम्। एने इत्येने। लोकम् गमयति। गमयत्यत्र। अत्र रमेथाम्। रमेथाँव्वर्ष्मन्न्। वर्ष्मन् पृथिव्याः। पृथिव्या इति। इत्याह। आह वर्ष्म। वर्ष्म हि। ह्येतत्। एतत् पृथिव्याः। पृथिव्या यत्। यद् देवयजनम्। देवयजनꣳ शिरः। देवयजनमिति देव—यजनम्। शिरो वै। वा एतत्। एतद् यज्ञस्य। यज्ञस्य यत्। यद्धविर्धानम्। हविर्द्धानम् दिवः। हविर्द्धानमिति हविः—धानम्। दिवो वा। वा विष्णो। विष्णवुत। उत वा। वा पृथिव्याः। पृथिव्या इति। ॥ [४७] ॥ इत्याशीर्पदया। आशीर्पदयर्चा। आशीर्पदयेत्याशीः—पदया। ऋचा दक्षिणस्य। दक्षिणस्य हविर्द्धानस्य। हविर्द्धानस्य मेथीम्। हविर्द्धानस्येति हविः—धानस्य। मेथीम् नि। नि हन्ति। हन्ति शीर्षतः। शीर्षत एव। एव यज्ञस्य। यज्ञस्य यजमानः। यजमान आशिषः। आशिषोऽव। आशिष इत्या—शिषः। अव रुन्धे। रुन्धे दण्डः। दण्डो वै। वा औपरः। औपरस्तृतीयस्य। तृतीयस्य हविर्द्धानस्य। हविर्द्धानस्य वषट्कारेण। हविर्द्धानस्येति हविः—धानस्य। वषट्कारेणाक्षम्। वषट्कारेणेति वषट्—कारेण। अक्षमच्छिनत्। अच्छिनद् यत्। यत् तृतीयम्। तृतीयम् छदिः। छदिर्हविर्द्धानयोः। हविर्द्धानयोरुदाह्रियते। हविर्द्धानयोरिति

ह॒विः—धाने॑योः। उ॒दा॒ह्रि॒यते॑ तृ॒तीय॑स्य। उ॒दा॒ह्रि॒यत॒ इत्यु॑त्—आ॒ह्रि॒यते᳚। तृ॒तीय॑स्य हवि॒र्द्धा-ने॑स्य। ह॒वि॒र्द्धा॒न॒स्याव॑रुद्ध्यै। ह॒वि॒र्द्धा॒न॒स्येति॑ ह॒विः—धाने॑स्य। अव॑रुद्ध्यै॒ शिरः॑। अव॑रुद्ध्या॒ इत्यव॑—रु॒द्ध्यै॒। शिरो॒ वै। वा ए॒तत्। ए॒तद् य॒ज्ञस्य॑। य॒ज्ञस्य॒ यत्। यद्ध॑वि॒र्द्धाने᳚म्। ह॒वि॒र्द्धा॒न-व्विँष्णो᳚ः। ह॒वि॒र्द्धा॒नमिति॑ ह॒विः—धाने᳚म्। विष्णो॑ र॒राट॑म्। र॒राट॑मसि। अ॒सि॒ विष्णो᳚ः। विष्णो᳚ः पृ॒ष्ठम्। पृ॒ष्ठम॑सि। अ॒सीति॑। इत्या॑ह। आ॒ह॒ तस्मा᳚त्। तस्मा॑दे॒ताव॒द्धा। ए॒ताव॒द्धा शिरः॑। ए॒ताव-द्धेत्ये॑ताव॑त्—धा। शिरो॒ विष्यू॑तम्। विष्यू॑त॒व्विँष्णो᳚ः। विष्यू॑त॒मिति॒ वि—स्यू॒त॒म्। विष्णोः॒ स्यूः। स्यूर॑सि। अ॒सि॒ विष्णो᳚ः। विष्णो᳚र् ध्रु॒वम्। ध्रु॒वम॑सि। अ॒सीति॑। इत्या॑ह। आ॒ह॒ वै॒ष्ण॒वम्। वै॒ष्ण॒वꣳ हि। हि दे॒वत॑या। दे॒वत॑या हवि॒र्द्धाने᳚म्। ह॒वि॒र्द्धा॒न॒य्यँम्। ह॒वि॒र्द्धा॒नमिति॑ ह॒विः—धाने᳚म्। यम् प्र॑थ॒मम्। प्र॒थ॒मम् ग्र॒न्थिम्। ग्र॒न्थिम् ग्र॑थ्नी॒यात्। ग्र॒थ्नी॒याद् यत्। यत् तम्। तम् न। न वि॒स्र॒ꣳ-सये᳚त्। वि॒स्र॒ꣳ॒सये॑द॒मेहे॑न। वि॒स्र॒ꣳ॒सये॒दिति॑ वि—स्र॒ꣳ॒सये᳚त्। अ॒मेहे॑नाद्ध्व॒र्युः। अ॒द्ध्व॒र्युः प्र। प्र मी॑येत। मी॒ये॒त॒ तस्मा᳚त्। तस्मा॒थ् सः। स वि॒स्रस्यः॑। वि॒स्रस्य॒ इति॑ वि—स्रस्यः॑॥ ॥ [४८] ॥

(पत्नी॑ ह॒न्त्यु॑ र्वा पृ॒थि॒व्या विष्यू॑त॒म् विष्णो॒ः षड्वि॑ꣳशतिश्च) ॥ ९ ॥

दे॒वस्य॑ त्वा। त्वा॒ स॒वि॒तुः। स॒वि॒तुः प्र॑स॒वे। प्र॒स॒व इति॑। प्र॒स॒व इति॑ प्र—स॒वे। इत्य॒भ्रि᳚म्। अ॒भ्रिमा। आ द॑त्ते। द॒त्ते॒ प्रसू᳚त्यै। प्रसू᳚त्या अ॒श्विनो᳚ः। प्रसू᳚त्या॒ इति॒ प्र—सू॒त्यै॒। अ॒श्विनो᳚र् बा॒हुभ्या᳚म्। बा॒हुभ्या॒मिति॑। बा॒हुभ्या॒मिति॑ बा॒हु—भ्या॒म्। इत्या॑ह। आ॒हा॒श्विनौ᳚। अ॒श्विनौ॒ हि। हि दे॒वाना᳚म्। दे॒वाना॑मद्ध्व॒र्यू। अ॒द्ध्व॒र्यू आस्ता᳚म्। अ॒द्ध्व॒र्यू इत्य॑द्ध्व॒र्यू। आस्ता᳚म् पू॒ष्णः। पू॒ष्णो हस्ता᳚भ्याम्। हस्ता᳚भ्या॒मिति॑। इत्या॑ह। आ॒ह॒ यत्यै᳚। यत्यै॒ वज्रः॑। वज्र॑ इव। इ॒व॒ वै। वा ए॒षा। ए॒षा यत्। यद॒भ्रिः। अ॒भ्रिर॒भ्रिः। अ॒भ्रिर॑सि। अ॒सि॒ नारिः॑। नारि॑रसि। अ॒सीति॑। इत्या॑ह। आ॒ह॒ शान्त्यै᳚। शान्त्यै॒ काण्डे॑काण्डे। काण्डे॑काण्डे॒ वै। काण्डे॑काण्ड॒ इति॒ काण्डे᳚—का॒ण्डे॒। वै क्रि॒यमा॑णे। क्रि॒यमा॑णे य॒ज्ञम्। य॒ज्ञꣳ रक्षाꣳ॑सि। रक्षाꣳ॑सि॒ जिघाꣳ॑सन्ति। जि॒घाꣳ॒॑स॒न्ति॒ परि॑लिखितम्। परि॑लिखित॒ꣳ॒ रक्षः॑। परि॑लिखित॒मिति॒ परि॑—लि॒खि॒त॒म्। रक्षः॒ परि॑लि-खिताः। परि॑लिखिता॒ अरा॑तयः। परि॑लिखिता॒ इति॒ परि॑—लि॒खि॒ताः। अरा॑तय॒ इति॑। इत्या॑ह। आ॒ह॒ रक्ष॑साम्। रक्ष॑सा॒मप॑हत्यै। अप॑हत्या इ॒दम्। अप॑हत्या॒ इत्यप॑—ह॒त्यै॒। ॥ [४९] ॥

इदमहम्। अहꣳ रख्षसः। रख्षसो ग्रीवाः। ग्रीवा अपि। अपि कृन्तामि। कृन्तामि यः। योऽस्मान्। अस्मान् द्वेष्टि। द्वेष्टि यम्। यम् च। च वयम्। वयम् द्विष्मः। द्विष्म इति। इत्याह। आह द्वौ। द्वौ वाव। वाव पुरुषौ। पुरुषौ यम्। यम् च। चै व। एव द्वेष्टि। द्वेष्टि यः। यश्च। चैनम्। एनम् द्वेष्टि। द्वेष्टि तयोः। तयोरेव। एवानन्तरायम्। अनन्तरायम् ग्रीवाः। अनन्तरा-यमित्यनन्तः—आयम्। ग्रीवाः कृन्तति। कृन्तति दिवे। दिवे त्वा। त्वाऽन्तरिख्षाय। अन्त-रिख्षाय त्वा। त्वा पृथिव्यै। पृथिव्यै त्वा। त्वेति। इत्याह। आहैभ्यः। एभ्य एव। एवैनाम्। एनाल्ँलोकेभ्यः। लोकेभ्यः प्र। प्रोख्षति। उख्षति परस्तात्। परस्तादर्वाचीम्। अर्वाचीम् प्र। प्रोख्षति। उख्षति तस्मात्। तस्मात् परस्तात्। ॥ [५०] ॥ परस्तादर्वाचीम्। अर्वाचीम् मनुष्याः। मनुष्या ऊर्जम्। ऊर्जमुप। उप जीवन्ति। जीवन्ति क्रूरम्। क्रूरमिव। इव वै। वा एतत्। एतत् करोति। करोति यत्। यत् खनति। खनत्यपः। अपोऽव। अव नयति। नयति शान्त्यै। शान्त्यै यवमतीः। यवमतीरव। यवमतीरिति यव—मतीः। अव नयति। नयत्यूर्क्। ऊर्ग् वै। वै यवः। यव ऊर्क्। ऊर्गुदुम्बरः। उदुम्बर ऊर्जा। ऊर्जैव। एवोर्जम्। ऊर्जꣳ सम्। समर्द्धयति। अर्द्धयति यजमानेन। यजमानेन सम्मिता। सम्मितौदुम्बरी। सम्मितेति सम्—मिता। औदुम्बरी भवति। भवति यावान्। यावानेव। एव यजमानः। यजमानस्ता-वतीम्। तावतीमेव। एवास्मिन्न्। अस्मिन्नूर्जम्। ऊर्जम् दधाति। दधाति पितृणाम्। पितृणाꣳ सदनम्। सदनमसि। असीति। इति बर्हिः। बर्हिरव। अव स्तृणाति। स्तृणाति पितृदे-वत्यम्। पितृदेवत्यꣳ हि। पितृदेवत्यमिति पितृ—देवत्यम्। ॥ [५१] ॥ ह्येतत्। एतद् यत्। यन् निखातम्। निखातय्ँयत्। निखातमिति नि—खातम्। यद् बर्हिः। बर्हिरनवस्तीर्य। अन-वस्तीर्य मिनुयात्। अनवस्तीर्येत्यनव—स्तीर्य। मिनुयात् पितृदेवत्या। पितृदेवत्या निखाता। पितृदेवत्येति पितृ—देवत्या। निखाता स्यात्। निखातेति नि—खाता। स्याद् बर्हिः। बर्हिर-वस्तीर्य। अवस्तीर्य मिनोति। अवस्तीर्येत्यव—स्तीर्य। मिनोत्यस्याम्। अस्यामेव। एवैनाम्। एनाम् मिनोति। मिनोत्यथो। अथो स्वारुहम्। अथो इत्यथो। स्वारुहमेव। स्वारुहमिति स्व—रुहम्। एवैनाम्। एनाम् करोति। करोत्युत्। उद् दिवम्। दिवꣳ स्तभान। स्तभाना। आऽन्त-रिख्षम्। अन्तरिख्षम् पृण। पृणेति। इत्याह। आहैषाम्। एषाल्ँलोकानाम्। लोकानाव्विधृत्यै।

विधृत्यै द्युतानः। विधृत्या इति वि—धृत्यै। द्युतानस्त्वा। त्वा मारुतः। मारुतो मिनोतु। मिनोत्विति। इत्याह। आह द्युतानः। द्युतानो ह। ह स्म। स्म वै। वै मारुतः। मारुतो देवानाम्। देवानामौदुम्बरीम्। औदुम्बरीम् मिनोति। मिनोति तेन। तेनैव। एवैनाम्। ॥ [५२] ॥ एनाम् मिनोति। मिनोति ब्रह्मवनिम्। ब्रह्मवनिम् त्वा। ब्रह्मवनिमिति ब्रह्म—वनिम्। त्वा क्षत्रवनिम्। क्षत्रवनिमिति। क्षत्रवनिमिति क्षत्र—वनिम्। इत्याह। आह यथायजुः। यथायजुरेव। यथायजुरिति यथा—यजुः। एवैतत्। एतद् घृतेन। घृतेन द्यावापृथिवी। द्यावापृथिवी आ। द्यावापृथिवी इति द्यावा—पृथिवी। आ पृणेथाम्। पृणेथामिति। इत्यौदुम्बर्याम्। औदुम्बर्याम् जुहोति। जुहोति द्यावापृथिवी। द्यावापृथिवी एव। द्यावापृथिवी इति द्यावा—पृथिवी। एव रसेन। रसेनानक्ति। अनक्त्यान्तम्। आन्तमन्ववस्रावयति। आन्तमित्या—अन्तम्। अन्ववस्रावयत्यान्तम्। अन्ववस्रावयतीत्यनु—अवस्रावयति। आन्तमेव। आन्तमित्या—अन्तम्। एव यजमानम्। यजमानम् तेजसा। तेजसाऽनक्ति। अनक्त्यैन्द्रम्। ऐन्द्रमसि। असीति। इति छदिः। छदिरधि। अधि नि। नि दधाति। दधात्यैन्द्रम्। ऐन्द्रꣳ हि। हि देवतया। देवतया सदः। सदो विश्वजनस्य। विश्वजनस्य छाया। विश्वजनस्येति विश्व—जनस्य। छायेति। इत्याह। आह विश्वजनस्य। विश्वजनस्य हि। विश्वजनस्येति विश्व—जनस्य। ह्येषा। एषा छाया। छाया यत्। यथ् सदः। सदो नवछदि। नवछदि तेजस्कामस्य। नवछदीति नव—छदि। ॥ [५३] ॥ तेजस्कामस्य मिनुयात्। तेजस्कामस्येति तेजः—कामस्य। मिनुयात् त्रिवृता। त्रिवृता स्तोमेन। त्रिवृतेति त्रि—वृता। स्तोमेन सम्मितम्। सम्मितम् तेजः। सम्मितमिति सम्—मितम्। तेजस्त्रिवृत्। त्रिवृत् तेजस्वी। त्रिवृदिति त्रि—वृत्। तेजस्व्येव। एव भवति। भवत्येकादशछदि। एकादशछदीन्द्रियकामस्य। एकादशछदीत्येकादश—छदि। इन्द्रियकामस्यैकादशाक्षरा। इन्द्रियकामस्येतीन्द्रिय—कामस्य। एकादशाक्षरा त्रिष्टुक्। एकादशाक्षरेत्येकादश—अक्षरा। त्रिष्टुगिन्द्रियम्। इन्द्रियम् त्रिष्टुक्। त्रिष्टुगिन्द्रियावी। इन्द्रियाव्येव। एव भवति। भवति पञ्चदशछदि। पञ्चदशछदि भ्रातृव्यवतः। पञ्चदशछदीति पञ्चदश—छदि। भ्रातृव्यवतः पञ्चदशः। भ्रातृव्यवत इति भ्रातृव्य—वतः। पञ्चदशो वज्रः। पञ्चदश इति पञ्च—दशः। वज्रो भ्रातृव्याभिभूत्यै। भ्रातृव्याभिभूत्यै सप्तदशछदि। भातृव्याभिभूत्या इति भ्रातृव्य—अभिभूत्यै। सप्तदशछदि प्रजा-

कामस्य। सप्तदशछदीति सप्तदश—छदि। प्रजाकामस्य सप्तदशः। प्रजाकामस्येति प्रजा—कामस्य। सप्तदशः प्रजापतिः। सप्तदश इति सप्त—दशः। प्रजापतिः प्रजापतेः। प्रजापतिरिति प्रजा—पतिः। प्रजापतेराप्त्यै। प्रजापतेरिति प्रजा—पतेः। आप्त्या एकविꣳशतिछदि। एकविꣳशतिछदि प्रतिष्ठाकामस्य। एकविꣳशतिछदीत्येकविꣳशति—छदि। प्रतिष्ठाकामस्यैकविꣳशः। प्रतिष्ठाकामस्येति प्रतिष्ठा—कामस्य। एकविꣳशः स्तोमानाम्। एकविꣳश इत्येक—विꣳशः। स्तोमानाम् प्रतिष्ठा। प्रतिष्ठा प्रतिष्ठित्यै। प्रतिष्ठेति प्रति—स्था। प्रतिष्ठित्या उदरम्। प्रतिष्ठित्या इति प्रति—स्थित्यै। उदरꣳवै। वै सदः। सद ऊर्क्। ऊर्गुदुम्बरः। उदुम्बरो मद्ध्यतः। मद्ध्यत औदुम्बरीम्। औदुम्बरीम् मिनोति। मिनोति मद्ध्यतः। मद्ध्यत एव। एव प्रजानाम्। प्रजानामूर्जम्। प्रजानामिति प्र—जानाम्। ऊर्जम् दधाति। दधाति तस्मात्। तस्मान् मद्ध्यतः। ॥ [५४] ॥ मद्ध्यत ऊर्जा। ऊर्जा भुञ्जते। भुञ्जते यजमानलोके। यजमानलोके वै। यजमानलोक इति यजमान—लोके। वै दक्षिणानि। दक्षिणानि छदीꣳषि। छदीꣳषि भ्रातृव्यलोके। भ्रातृव्यलोक उत्तराणि। भ्रातृव्यलोक इति भ्रातृव्य—लोके। उत्तराणि दक्षिणानि। उत्तराणीत्युत्—तराणि। दक्षिणान्युत्तराणि। उत्तराणि करोति। उत्तराणीत्युत्—तराणि। करोति यजमानम्। यजमानमेव। एवायजमानात्। अयजमानादुत्तरम्। उत्तरम् करोति। उत्तरमित्युत्—तरम्। करोति तस्मात्। तस्माद् यजमानः। यजमानोऽयजमानात्। अयजमानादुत्तरः। उत्तरोऽन्तर्वर्तान्। उत्तर इत्युत्—तरः। अन्तर्वर्तान् करोति। अन्तर्वर्तानित्यन्तः—वर्तान्। करोति व्यावृत्त्यै। व्यावृत्त्यै तस्मात्। व्यावृत्त्या इति वि—आवृत्त्यै। तस्मादरण्यम्। अरण्यम् प्रजाः। प्रजा उप। प्रजा इति प्र—जाः। उप जीवन्ति। जीवन्ति परि। परि त्वा। त्वा गिर्वणः। गिर्वणो गिरः। गिर इति। इत्याह। आह यथायजुः। यथायजुरेव। यथायजुरिति यथा—यजुः। एवैतत्। एतदिन्द्रस्य। इन्द्रस्य स्यूः। स्यूरसि। असीन्द्रस्य। इन्द्रस्य ध्रुवम्। ध्रुवमसि। असीति। इत्याह। आहैन्द्रम्। ऐन्द्रꣳ हि। हि देवतया। देवतया सदः। सदो यम्। यम् प्रथमम्। प्रथमम् ग्रन्थिम्। ग्रन्थिम् ग्रथ्नीयात्। ग्रथ्नीयाद् यत्। यत् तम्। तम् न। न विस्रꣳसयेत्। विस्रꣳसयेदमेहेन। विस्रꣳसयेदिति वि—सꣳस्रयेत्। अमेहेनादध्वर्युः। अदध्वर्युः प्र। प्र मीयेत। मीयेत तस्मात्। तस्माथ् सः। स विस्रस्यः। विस्रस्य इति वि—स्रस्यः॥ ॥ [५५] ॥

(अपहत्यै तस्मात् पितृदेवत्यम् तेनैव नवछदि तस्माथ् सदः पञ्चदश च) ॥ १० ॥

शिरो वै। वा एतत्। एतद् यज्ञस्य। यज्ञस्य यत्। यद्धविर्द्धानम्। हविर्द्धानम् प्राणाः। हविर्द्धानमिति हविः—धानम्। प्राणा उपरवाः। प्राणा इति प्र—अनाः। उपरवा हविर्द्धाने। उपरवा इत्युप—रवाः। हविर्द्धाने खायन्ते। हविर्द्धान इति हविः—धाने। खायन्ते तस्मात्। तस्माच्छीर्षन्न्। शीर्षन् प्राणाः। प्राणा अधस्तात्। प्राणा इति प्र—अनाः। अधस्तात् खायन्ते। खायन्ते तस्मात्। तस्मादधस्तात्। अधस्ताच्छीर्ष्णः। शीर्ष्णः प्राणाः। प्राणा रख्षोहणः। प्राणा इति प्र—अनाः। रख्षोहणो वलगहनः। रख्षोहण इति रख्षः—हनः। वलगहनो वैष्णवान्। वलगहन इति वलग—हनः। वैष्णवान् खनामि। खनामीति। इत्याह। आह वैष्णवाः। वैष्णवा हि। हि देवतया। देवतयोपरवाः। उपरवा असुराः। उपरवा इत्युप—रवाः। असुरा वै। वै निर्यन्तः। निर्यन्तो देवानाम्। निर्यन्त इति निः—यन्तः। देवानाम् प्राणेषु। प्राणेषु वलगान्। प्राणेष्विति प्र—अनेषु। वलगान् नि। वलगानिति वल—गान्। न्यखनन्न्। अखनन् तान्। तान् बाहुमात्रे। बाहुमात्रेऽनु। बाहुमात्र इति बाहु—मात्रे। अन्वविन्दन्न्। अविन्दन् तस्मात्। तस्माद् बाहुमात्राः। बाहुमात्राः खायन्ते। बाहुमात्रा इति बाहु—मात्राः। खायन्त इदम्। इदमहम्। अहम् तम्। तवँ्वलगम्। वलगमुत्। वलगमिति वल—गम्। उद् वपामि। वपामि यम्। ॥ [५६] ॥ यम् नः। नः समानः। समानो यम्। यमसमानः। असमानो निचखान। निचखानेति। निचखानेति नि—चखान। इत्याह। आह द्वौ। द्वौ वाव। वाव पुरुषौ। पुरुषौ यः। यश्च। चैव। एव समानः। समानो यः। यश्च। चासमानः। असमानो यम्। यमेव। एवास्मै। अस्मै तौ। तौ वलगम्। वलगम् निखनतः। वलगमिति वल—गम्। निखनतस्तम्। निखनत इति नि—खनतः। तमेव। एवोत्। उद् वपति। वपति सम्। सम् तृणत्ति। तृणत्ति तस्मात्। तस्माथ् सन्तृण्णाः। सन्तृण्णा अन्तरतः। सन्तृण्णा इति सम्—तृण्णाः। अन्तरतः प्राणाः। प्राणा न। प्राणा इति प्र—अनाः। न सम्। सम् भिनत्ति। भिनत्ति तस्मात्। तस्मादसम्भिन्नाः। असम्भिन्नाः प्राणाः। असम्भिन्ना इत्यसम्—भिन्नाः। प्राणा अपः। प्राणा इति प्र—अनाः। अपोऽव। अव नयति। नयति तस्मात्। तस्मादार्द्राः। आर्द्रा अन्तरतः।

अन्तरतः प्राणाः। प्राणा यवमतीः। प्राणा इति प्र—अनाः। यवमतीरव। यवमतीरिति यव—
मतीः। अव नयति। नयत्यूर्क्। ॥ [५७] ॥ ऊर्ग् वै। वै यवः। यवः प्राणाः। प्राणा उप-
रवाः। प्राणा इति प्र—अनाः। उपरवाः प्राणेषु। उपरवा इत्युप—रवाः। प्राणेष्वेव। प्राणेष्विति
प्र—अनेषु। एवोर्जम्। ऊर्जम् दधाति। दधाति बर्हिः। बर्हिरव। अव स्तृणाति। स्तृणाति
तस्मात्। तस्माल्लोमशाः। लोमशा अन्तरतः। अन्तरतः प्राणाः। प्राणा आज्येन। प्राणा इति
प्र—अनाः। आज्येन व्याघारयति। व्याघारयति तेजः। व्याघारयतीति वि—आघारयति। तेजो
वै। वा आज्यम्। आज्यम् प्राणाः। प्राणा उपरवाः। प्राणा इति प्र—अनाः। उपरवाः प्राणेषु।
उपरवा इत्युप—रवाः। प्राणेष्वेव। प्राणेष्विति प्र—अनेषु। एव तेजः। तेजो दधाति। दधाति
हनू। हनू वै। हनू इति हनू। वा एते। एते यज्ञस्य। एते इत्येते। यज्ञस्य यत्। यदधिषवणे।
अधिषवणे न। अधिषवणे इत्यधि—सवने। न सम्। सम् तृणत्ति। तृणत्त्यसन्तृण्णे। असन्तृण्णे
हि। असन्तृण्णे इत्यसम्—तृण्णे। हि हनू। हनू अथो। हनू इति हनू। अथो खलु। अथो इत्यथो।
खलु दीर्घसोमे। दीर्घसोमे सन्तृद्ये। दीर्घसोम इति दीर्घ—सोमे। सन्तृद्ये धृत्यै। सन्तृद्ये इति
सम्—तृद्ये। धृत्यै शिरः। शिरो वै। वा एतत्। एतद् यज्ञस्य। यज्ञस्य यत्। यद्धविर्द्धानम्।
हविर्द्धानम् प्राणाः। हविर्द्धानमिति हविः—धानम्। ॥ [५८] ॥ प्राणा उपरवाः। प्राणा इति
प्र—अनाः। उपरवा हनू। उपरवा इत्युप—रवाः। हनू अधिषवणे। हनू इति हनू। अधिष-
वणे जिह्वा। अधिषवणे इत्यधि—सवने। जिह्वा चर्म। चर्म ग्रावाणः। ग्रावाणो दन्ताः। दन्ता
मुखम्। मुखमाहवनीयः। आहवनीयो नासिका। आहवनीय इत्या—हवनीयः। नासिकोत्तर-
वेदिः। उत्तरवेदिरुदरम्। उत्तरवेदिरित्युत्तर—वेदिः। उदरꣳ सदः। सदो यदा। यदा खलु।
खलु वै। वै जिह्वया। जिह्वया दथ्सु। दथ्स्वधि। दथ्स्विति दत्—सु। अधि खादति। खादत्यथ।
अथ मुखम्। मुखम् गच्छति। गच्छति यदा। यदा मुखम्। मुखम् गच्छति। गच्छत्यथ।
अथोदरम्। उदरम् गच्छति। गच्छति तस्मात्। तस्माद्धविर्द्धाने। हविर्द्धाने चर्मन्न्। हविर्द्धाने
इति हविः—धाने। चर्मन्नधि। अधि ग्रावभिः। ग्रावभिरभिषुत्य। ग्रावभिरिति ग्राव—भिः। अभि-
षुत्याहवनीये। अभिषुत्येत्यभि—सुत्य। आहवनीये हुत्वा। आहवनीय इत्या—हवनीये। हुत्वा
प्रत्यञ्चः। प्रत्यञ्चः परेत्य। परेत्य सदसि। परेत्येति परा—इत्य। सदसि भक्षयन्ति। भक्षयन्ति

यः। यो वै। वै विराजः। विराजो यज्ञमुखे। विराज इति वि—राजः। यज्ञमुखे दोहम्। यज्ञमुख इति यज्ञ—मुखे। दोहव्वँदे। वेद दुहे। दुह एव। एवैनाम्। एनामियम्। इयव्वैँ। वै विराट्। विराट् तस्यै। विराडिति वि—राट्। तस्यै त्वक्। त्वक् चर्म। चर्माधः। ऊधोऽधिषवणे। अधिषवणे स्तनाः। अधिषवणे इत्यधि—सवने। स्तना उपरवाः। उपरवा ग्रावाणः। उपरवा इत्युप—रवाः। ग्रावाणो वथ्साः। वथ्सा ऋत्विजः। ऋत्विजो दुहन्ति। दुहन्ति सोमः। सोमः पयः। पयो यः। य एवम्। एवव्वँदे। वेद दुहे। दुह एव। एवैनाम्। एनामित्येनाम्॥ ॥ [५९] ॥

(वपामि यवमतीरव नयति हविर्द्धानं मेव त्रयोविꣳशतिश्च) ॥ ११ ॥

॥ हरिः ॐ ॥

षष्ठकाण्डे द्वितीयः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ५९ |

ॐ